# Sarva Deva Devi Sadbhakti Sumaguchcham

# સર્વ દેવદેવી સદ્ભક્તિ સુમગુચ્છમ્

## Document Information

Text title : Sarva Deva Devi Sadbhakti Sumaguchcham

File name : sarvadevadevIsadbhaktisumaguchCham.itx

Category : devii, vishhnu, krishna, shiva, raama, gurudev, sarasvatI, sangraha, ganesha, shataka

Location : doc_devii

Author : Smt. Rajeshwari Govindaraj

Transliterated by : Smt. Rajeshwari Govindaraj

Proofread by : Smt. Rajeshwari Govindaraj

Latest update : January 30, 2020

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 16, 2023

*sanskritdocuments.org*

# સર્વ દેવદેવી સદ્ભક્તિ સુમગુચ્છમ્

ॐ

ॐકાર નાદાનુરક્તં મહાગણપતિં સર્વાભીષ્ટપ્રદાયકં
સર્વ કાર્યારમ્ભાદિ પૂજિતં ઉમાશઙ્કર સુખકારકં
ગજકર્ણકં ગજમુખં ગીતસુધાપ્રિયમ્ ઉપાસ્મહે
સ્મરામહે ભજામહે ॥

## ૧ ગણેશગીતમ્

પાર્વતી નન્દનં વિઘ્નવિનાશકં
પ્રથમાર્ચિત ચરણં ઉપાસ્મહે ॥ પલ્લવિ ॥

પાશાઙ્કુશધરમ્ સર્વ વિઘ્નહરં
ભવસઞ્ચિત પાપ તિમિરહરં ભાસ્કરં
મૂલાધાર ચક્ર નીવાસિનં
સુરરાજાર્ચિતં સ્મરામહે ॥ ૧ ॥

મૂષિક વાહનં લમ્બોદરં
સ્કન્દપૂર્વજં વીતરાગિણં
જગત્પાવન કારણં અજં
પરમ શુભઙ્કરં ભજામહે ॥ ૨ ॥

## ૨ સરસ્વતી ગીતમ્

પરમપદ સોપાનારોહણ ભાગ્યં દેહિ મે વાગીશ્વરિ
નિજભક્તિ સ્વાદયુત આત્મબલં દેહિ મે યોગેશ્વરિ
જ્ઞાનેશ્વરિ ॥ પલ્લવિ ॥

અમ્બુજાસન હૃદયેશ્વરિ સમસ્વર સમ્પદેશ્વરિ

રાગલયભાવાકરિ
તુમ્બુરુ નારદ દિવિજાદિ કીર્તિતે
પરબ્રહ્મ સેવાધુરન્ધરિ
પરાનાદ બિન્દુ કલામન્દિર નાટ્યમયૂરિ
નટનરત કિન્નરિ
શ્ૃતિસ્મૃતિ ગીતાદિ દિવ્યગ્રન્થરૂપધરિ
સુગીતસુધાકરિ ॥ ૧॥

મહાવિચિત્ર પદ ચદુરઙ્ગ વિનોદિનિ
મહોદયે મહાદ્ભુત વાચ્યાર્થ ગૂઢાર્થયુત ભાષાશ્રયે
વિવિધાક્ષર પદ ભાવ સંયોજક
પ્રતિભા વીણાવાદનપ્રિયે
ભાષણ ગાયન ચિન્તન સ્ફુરણ લેખન ।
યાત્રીકોઽસ્મિ તવ પરિતુષ્ટયે ॥ ૨॥

## ૩ ગાયત્રી ગીતમ્

શ્લોક ॥ બ્રહ્મતેજો વિવર્ધિનિ બ્રહ્માસ્ત્રરૂપિણિ
બ્રહ્મલોક નિવાસિનિ પરબ્રહ્મરૂપિણિ
પઞ્ચભૂતરૂપિણિ પઞ્ચમુખિ ત્રિલોચનિ
પઞ્ચક્લેશ હારિણિ પ્રણતાર્તિવિનાશિનિ ॥ પલ્લવિ॥

જીવકોટિપાવનિ ગાયત્રિ જનનિ
સપ્તકોટિ મહામન્ત્રરૂપિણિ
પ્રાતઃસન્ધ્યાર્ચિતે હંસવાહનિ
અપરાહ્ણોપાસિતે ગરુડવાહનિ
સાયં સન્ધ્યાર્ચિતે વૃષભવાહનિ
સર્વકાલપૂજિતે મહાયોગિનિ ॥ ૧॥

દિવ્યપથ સઞ્ચારિણિ જયશાલિનિ
દિવ્યમોદ દાયિનિ ચારુહાસિનિ
ધીશક્તિ પ્રચોદિનિ બન્ધમોચનિ
દુરિતવિદૂરિણિ દીક્ષારૂપિણિ ॥ ૨॥

ઇચ્છાશક્તિપ્રસાદિનિ કલ્યાણિ

જ્ઞાનશક્તિ પ્રકાશિનિ બ્રહ્માણિ
ક્રિયાશક્તિ સઞ્ચાલિનિ દેવિ ભવાનિ
સર્વશક્તિદાયિનિ ગીતસુધાવનિ ॥ ૩॥

## ૪ સરસ્વતી ગીતમ્

જ્ઞાનરત્નાકરિ શ્વેતામ્બરિ
વીણા પુસ્તક જપમાલાધરિ ॥ પલ્લવિ॥

વાઙ્માનસગોચર લોકપાવનિ
વાક્શક્તિ દાયિનિ વૈખરીચાલિનિ
રસસિદ્ધિ પ્રાપ્તિપ્રિય સમ્પોષિણિ
સરસ વિરસાતીત સામરસ્ય બોધિનિ ॥ ૧॥

ચાઞ્ચલ્ય દોષાપહારિણિ હરિણિ
ચાપલ્ય કાલુષ્ય દૂરિણિ જનનિ
સકલ કલાપોષિણિ ગીતસુધાવાહિનિ
અખિલાનુભવસાર રસવારુણિ ॥ ૨॥

મોહ પ્રમાદવશ ભક્તોદ્ધારિણિ
કામકામી મનોસંશુદ્ધિકારિણિ
પ્રેમયોગનિરત દૈન્યનિવારિણિ
ધ્યાનમૌનવ્રતાન્તે દીપ્તિવર્ધિનિ ॥ ૩॥

## ૫ લક્ષ્મી ગીતમ્

રમ્યવેણી રમા પલ્લવપાણી
આગચ્છતુ વિષ્ણુના સહ સૌમ્યનયની ॥ પલ્લવિ॥

ક્ષીરસમુદ્ર રાજકુમારી
રક્ષતુ માં જ્ઞાનદીપાઙ્કુરી
બ્રહ્માણ્ડ ભાણ્ડોદરી દયાસાગરિ
રક્ષતુ માં કોલ્લાપુરીશ્વરી ॥ ૧॥

જડ નિદ્રાલસ્ય વશ શ્રિતોદ્ધારિણી
જડ ચેતનમય ભુવનૈકપાલિની

ભોગાપવર્ગ પ્રદાયિની લક્ષ્મી
રક્ષતુ માં સદા શ્રીવરલક્ષ્મી ॥ ૨॥

ચિન્તાગ્ની શમનકરી યશસ્કરી
સત્વગુણ વૃદ્ધિકરી શ્રેયસ્કરી
ચન્દ્રસહોદરિ અભયઙ્કરી
રક્ષતુ માં વૈકુણ્ઠાધીશ્વરી ॥ ૩॥

## ૬ દુર્ગા ગીતમ્

શ્રીચક્રરાજ સિંહાસનાસીને
ત્વાં સ્મરામિ ભાનુચન્દ્ર નયને ॥ પલ્લવિ॥

કદલી વન સઞ્ચારિણિ
આધારાદિ ષટ્ચક્ર નિવાસિનિ
સદસદ્વિવેક શીલ સુજ્ઞાનદે
સર્વકરણ નિગ્રહ શીલ મોદદે ॥ ૧॥

દૈત્યમર્દિનિ માતે મહોગ્રવદને
દયા ક્ષમાપૂરિણિ મહોલ્લાસવદને
કાલિ મહાકાલિ નવદુર્ગા રૂપધરિ
દુરિત ક્ષયકરિ વરદે બિમ્બાધરિ ॥ ૨॥

નાસ્તિક વાદ ધુરીણાપજયકારિણિ
આસ્તિક મહાશય ભક્તિ ભુક્તિ દાયિનિ
વિશ્વરૂપ પ્રદર્શિનિ અષ્ટાદશભુજે
ગીતસુધા સ્વાદિનિ હૃદયાબ્જે વિરજે ॥ ૩॥

## ૭ સરસ્વતી ગીતમ્

શ૰ૃઙ્ગેરિ પુરાધીશ્વરિ શુકધરિ
અક્ષ માલિકાધરિ હે અરુણામ્બરિ ॥ પલ્લવિ॥

હે વિદ્યાસાગરિ વિરિઞ્ચિ મનોહરિ
વિશ્વૈક શુભકરિ પાલય માં
સ્વસ્થમાનસકરિ સ્વેચ્છાપહરિ

સુધા કુમ્ભધરિ ગીતસુધાકરિ ॥ ૧॥

હે સર્વાક્ષર મૂલ પ્રણવપ્રકાશકિ
સર્વશાસ્ત્ર જ્ઞાન સમ્પત્પ્રદાયકિ
અનુપમ ગુણવર્ધકિ પાલય માં
અન્તરવલોકન પારવશ્ય દાયકિ ॥ ૨॥

હે શાસ્ત્રશરીરિણિ શાસ્ત્રસંરક્ષિણિ
શાસ્ત્રકોવિદ સ્તુત કોટિતન્ત્ર સ્વામિનિ
ઋષિહૃદયવાસિનિ બ્રહ્મતત્વસૌધામિનિ
ઋષિસ્ફુરણ પ્રકટિત નવભાવ સ્રોતરૂપિણિ ॥ ૩॥

## ૮ સરસ્વતી ગીતમ્

ગીર્વાણિ કલવાણિ વીણાપાણિ
ગીતસુધાવનિ ચતુરાસ્યભામિનિ ॥ પલ્લવિ॥

બુધજનરઞ્જનિ રસિકસમ્મોહિનિ
એઙ્કાર જપતોષિણિ ભક્તિજ્ઞાન દાયિનિ ।
ધૂમ્રલોચન સૂદનિ અભયદાયિનિ
શુમ્ભાસુર મર્દિનિ શાસ્ત્રરૂપિણિ
સુમૂર્તરૂપિણિ સુવાસિનિ
સૌભાગ્યવર્ધિનિ સુહાસિનિ ॥ ૧॥

મહાશ્રયે મહાપાપનાશિનિ
મહોદયે મહોત્સાહકારિણિ
નવરસ સુધામ્બુનિધિ વિહારિણિ
નવનવોન્મેષ શાલિનિ જનનિ ॥ ૨॥

## ૯ રાજરાજેશ્વરિ ગીતમ્

સહસ્રાર વિન્ધ્યાદ્રિ સદને ગતિસ્ત્વં
હ્રીઙ્કાર મન્ત્રજપ ફલદે ગતિસ્ત્વમ્ ॥ પલ્લવિ॥

ત્વમેવ માતે કન્યાકુમારિ
ત્વમેવ ત્રાતે દુર્ગાપરમેશ્વરિ

ત્વમેવ દાતે રાજરાજેશ્વરિ
ત્વમેવ બ્રહ્માણ્ડ ભાણ્ડોદરિ ॥ ૧॥

જ્ઞાન સિંહાસનાસીને શુભદે
સિંહવાહિનિ સર્વકર્મફલદે
રક્તવસ્ત્રધરિ વરદાભયકરિ
અસીમ તેજ વીર્ય મોદસાગરિ ॥ ૨॥

યુક્તાયુક્ત કર્માચરણ પ્રબોધિનિ
સત્યાસત્ય વિવેચન પ્રકાશિનિ
તારતમ્ય ભેદસામ્ય નિર્દેશિનિ
સુશ્રાવ્ય ગીતસુધોલ્લાસિનિ ॥ ૩॥

## ૧૦ લક્ષ્મી ગીતમ્

શ્રીકાન્ત ભામિનિ શ્રી મહાલક્ષ્મિ
શ્રીપ્રદાયિનિ અવતુ મામ્ ॥ પલ્લવિ ॥

ઇન્દુભગિનિ ઈપ્સિતદાયિનિ
ઇન્દુમુખિ ઈષણત્રયહારિણિ
શ્રેયોકારિણિ પ્રેયોપાલિનિ
અષ્ટૈશ્વર્ય પ્રદાયિનિ અવતુ મામ્ ॥ ૧॥

જીવપાવનિ જીવબલ વર્ધિનિ
ક્ષીરાબ્ધિ નન્દિનિ ગીતસુધાવનિ
આદ્યન્તરહિત વૈભવશાલિનિ
સ્થૈર્ય સૌખ્યદાયિનિ અવતુ મામ્ ॥ ૨॥

## ૧૧ દુર્ગાદેવી ગીતમ્

વિશ્વ મોહક લાવણ્યયુતે દેવિ રક્ષ માં
આદિપરાશક્તિ રાજર્ષિનુતે સંરક્ષ મામ્ ॥ પલ્લવિ ॥

સપ્તમાતૃકા રૂપધારિણિ જગજ્જનનિ
તપ્ત નતજનાવનિ આશ્રિત ભક્તપાવનિ
બ્રહ્મ વિષ્ણુ શમ્ભુ દિવિજવૃન્દસ્થિત શક્તિયુતે

લોકકણ્ટક મહિષાસુર મર્દિનિ જગત્રાતે ॥ ૧॥

દુર્ગા ભવાનિ ત્વં સ્વર્ગાપવર્ગપ્રદે
સર્ગચક્ર બન્ધમોચનપ્રિય ભક્તિશક્તિપ્રદે
રક્તબીજાસુર નિપાતિનિ ત્રિશૂલિનિ
શુમ્ભનિશુમ્ભ મદહારિણિ સિંહવાહનિ ॥ ૨॥

ઘણ્ટિનિ શઙ્ખિનિ ચક્રિણિ ગદિનિ ચન્દ્રાર્કલોચનિ
ધનુર્ધારિણિ શરપ્રયોગલીલા વિનોદિનિ
દિવ્ય શરીરધરિ હ્રીઙ્કાર તરુમઞ્જરિ
દિવ્યમાલ્યામ્બરધરિ ગીતસુધાસાગરિ ।
કિણિ કિણિ કિઙ્કિણિ ઘણ્ટાનાદ શઙ્ખનાદ
સ્વરૂપિણિ મઙ્ગલં તન્ત્રીનાદ ।
તાલનાદ વેણુનાદ મૃદઙ્ગનાદ સ્વરૂપિણિ ।
મઙ્ગલં ભેરીનાદ મેઘનાદ મઙ્ગલમ્ દશનાદ મઙ્ગલં
પરમાત્મ સાન્નિધ્યમોદનાદ મઙ્ગલં જય મઙ્ગલં
સર્વમઙ્ગલમ્ ॥

## ૧૨ સરસ્વતી ગીતમ્

શ્રી વાગીશ્વરિ બ્રહ્મવિદ્યાસાગરિ
શ્રદ્ધા મેધાઙ્કુરિ પ્રજ્ઞાધારણ ગોચરિ ।
રક્ષય માં પાલય મામ્ ॥ પલ્લવિ ॥

હિમસદૃશ કાન્તિવતિ શ્રી મહાસરસ્વતિ
દાનકર્મ વૃદ્ધિરતિ ચતુર્મુખ પ્રિયસતિ
ત્વમેવ ગાયત્રિ ધીપ્રચોદયિત્રિ
ત્વમેવ સાવિત્રિ સદ્વિદ્યાદાત્રિ ॥ ૧॥

ઐઙ્કાર જપ રાગિણિ પાશાઙ્કુશધારિણિ
અક્ષમાલા પુસ્તકધારિણિ ભવતારિણિ
બ્રહ્મમાનસ સરોવર વિહારિણિ
સર્વજનપાવનિ દ્યુલોકવાસિનિ ॥ ૨॥

સર્વ વર્ણ પદ વાક્યાર્થરૂપિણિ

શુદ્ધચિત્ત દર્પણ વાચ્યાર્થ બોધિનિ
રુદ્રાદિત્યરૂપિણિ ત્રિલોક નિયન્ત્રિણિ
આદ્યન્તરહિત તરઙ્ગિણિ રઞ્જનિ ॥ ૩॥

પરા પશ્યન્તી મધ્યમા વૈખરી-
વાગ્વિરાજિનિ અન્તર્યામિનિ
આધ્યાત્મિક આધિભૌતિક આધિદૈવિકરૂપિણિ
સમસ્ત વિદ્યાલોકે સઞ્ચારિણિ ॥ ૪॥

સુજ્ઞાનૈશ્વર્ય સમ્પ્રદાયિનિ
દિવ્ય ભાવોદ્દીપન મુદકારિણિ
સદ્ભક્તોદ્યાન કલ્પતરુરૂપિણિ
ગીતસુધાહર્ષિણિ વીણાપાણિ ॥ ૫॥

## ૧૩ લક્ષ્મીદેવી ગીતમ્

પઞ્ચબાણ જનકપ્રિયે વિજયે
પ્રસીદ મમ ભક્તાશ્રયે ॥ પલ્લવિ॥

માધવ પાદસેવા તત્પરે
વેદવેત્ત મોદપ્રમોદાધારે
શમદમાદિ ષટ્સમ્પદકારિણિ
વૈકુણ્ઠલોકેશ્વર ભામિનિ ॥ ૧॥

સદાચાર સમ્પન્ન સંરક્ષિણિ
વ્યસનલોલ જન પરિવર્તિનિ
સાધુસેવાનિરત કૃપાસાગરિ
યજ્ઞશેષ પ્રિય શ્રિતાભયકરિ ॥ ૨॥

સદ્ધર્મપાલક સુજન શ્રેયસ્કરિ
સત્કર્મ લીન દીનજન સમ્પત્કરિ
નિત્યાનન્દકરિ ત્રિભુવનસુન્દરિ
શ્રીઙ્કાર બીજાક્ષરિ ગીતસુધાકરિ ॥ ૩॥

## ૧૪ લક્ષ્મી ગીતમ્

શ્રી વિષ્ણુવલ્લભે શુભે પાલય માં
ભક્તસુલભે દિવ્યપ્રભે પોષય મામ્ ॥ પલ્લવિ ॥

વૈકુણ્ઠાધીશ્વરિ અરુણામ્બરિ
સૌન્દર્યરત્નાકરિ ભુવનાનન્દકરિ
સૌભાગ્યદાયિનિ ગીતસુધાસ્વાદિનિ
કૃપાવર્ષિણિ અષ્ટલક્ષ્મિરૂપિણિ ॥ ૧ ॥

સરોરુહગન્ધિનિ સરોરુહ લોચનિ
સર્વક્લેશદૂરિણિ કારુણ્ય પુષ્કરિણિ
શોકમોહનાશિનિ નાકસૃષ્ટિકારિણિ
દારિદ્ર્યધ્વંસિનિ પુણ્યફલદાયિનિ ॥ ૨ ॥

## ૧૫ સરસ્વતી ગીતમ્

શ્લોકમ્ શ્રી સરસ્વતીં મયૂરવાહિનીં
શ્વેતવસ્ત્રાન્વિતાં શ્વેતપદ્માસનાં
જપમાલા પુસ્તકહસ્તાં
ગીતસુધાનુતાં અભયાં અક્ષયાં
અહર્નિશં ઉપાસ્મહે
વિદ્યાદાયિનિ શારદે
ચિરસુખકારિણિ વરદે ॥ પલ્લવિ ॥

કામરૂપિણિ પાતક નાશિનિ
કમલ લોચનિ કમલજ રાણિ
કચ્છપિ વીણાપાણિ કલ્યાણિ
સઙ્ગીત સાહિત્ય સુધાવર્ષિણિ ॥ ૧ ॥

જ્ઞાનવિજ્ઞાન તૃપ્તિ દાયિનિ
અવિદ્યા વારિધિ તારિણિ
સકલશાસ્ત્ર વિચાર રત્નાકરિ
સકલકલા રસિકે જ્ઞાનેશ્વરિ ॥ ૨ ॥

## ૧૬ સરસ્વતી ગીતમ્

માણિક્ય વીણા પાણિ
માધુર્ય રસવાહિની ॥ પલ્લવિ ॥

સકલ કલાસ્વાદિનિ કલ્યાણિ
સકલ વિદ્યાસ્વામિનિ ગીર્વાણિ
સકલ શાસ્ત્ર સઞ્ચારિણિ રઞ્જનિ
સકલાન્તર્યામિનિ નિરઞ્જનિ ॥ ૧ ॥

સકલ સંવેદનાજ્ઞાનરૂપિણિ
વિકલાત્મ પાવનિ ગીતસુધા તોષિણિ
મલિન મનો વૃત્તિ નિરોધિનિ
નલિનીદલમમ્બુવત્ સંરક્ષિણિ ॥ ૨ ॥

સરિગમ પદનિ સપ્તસ્વરરાગિણિ
સ્વર વ્યઞ્જન રત્નમાલા શોભિનિ
પ્રણવનાદ વલયાન્તર્વ્યાપિનિ
સર્વાક્ષર દીપ્તિપ્રસારિણિ ॥ ૩ ॥

## ૧૭ વાસવી ગીતમ્

શ્રી વાસવીદેવિ ત્વમેવ સૃષ્ટિશક્તિઃ
શ્રી દેવદેવિ ત્વમેવ પાલનશક્તિઃ
શ્રી પરદેવિ ત્વમેવ સંહાર શક્તિઃ
નમસ્તે નમસ્તે નમસ્તે ॥ પલ્લવિ ॥

પેનુગોણ્ડ પ્રતિષ્ઠિત દિવ્ય વનિતામણિ
પરાશક્ત્યવતારિણિ વાસવિ કૃપાવીક્ષણિ
વિરૂપાક્ષ પ્રિયસોદરિ ભવતારિણિ
કુસુમામ્બ કુસુમાખ્યનન્દિનિ રઞ્જનિ ॥ ૧ ॥

ધર્મરહસ્ય પ્રદીપિનિ જનનિ
ધર્મધ્વજારોહણ પ્રોલ્લાસિનિ
સુગુણ નવરત્ન માલાસંયોજનિ
સારસ ચરણ સુશોભિનિ પાવનિ ॥ ૨ ॥

અહિંસોદ્યમ સઞ્ચાલિનિ ત્યાગવ્રત પાલિનિ
આત્મબલિદાન રત વૈશ્યકુલ પથદર્શિનિ ।
વિરાડ્રૂપ પ્રદર્શિનિ ગીતસુધા વાહિનિ
આર્દ્રહૃદય પુષ્કરિણિ કવિપુઙ્ગવ વરદાયિનિ ॥ ૩॥

## ૧૮ લલિતા ગીતમ્

શ્રીચક્ર સિંહાસનાધીશ્વરિ
શ્રીવિદ્યોપાસક શુભઙ્કરિ ॥ પલ્લવિ॥

સુમેરુમધ્ય પ્રાસાદસ્થિતે
સુરતરુ સુરધેનુ સુરગણાશ્રિતે
ધીશક્તિ મનોશક્તિ તનુશક્તિ વૃધ્દસ્તુતે
ધરાધીશ યોગીશ નુતે શ્રીલલિતે ॥ ૧॥

મન્ત્ર તન્ત્ર યન્ત્ર બલવ્યાપિનિ ।
દેવ દૈત્ય કૃત તપઃસમદર્શિનિ
ભક્ત પરિરક્ષિણિ ગીતસુધા મોદિનિ
ચરાચર સ્વામિનિ સદ્યોમુક્તિદયિનિ ॥ ૨॥

## ૧૯ વાણી ગીતમ્

હે લલિતકલા સ્વારાજ્ય સ્થાપિનિ
હે લેખન વાચન નન્દન વિહારિણિ ॥ પલ્લવિ॥

સત્ય પ્રતિપાદના પુષ્કરિણિ વાણિ
સમસ્ત જીવકુલ ભાષાન્તર્યામિનિ
સર્વ જીવકુલ ભાવાન્તર્વાહિનિ
નાદ ગગન સઞ્ચારિણિ શ્રદ્ધાં ભક્તિં દેહિ મે ॥ ૧॥

સત્યલોકવાસિનિ શ્વેતહંસવાહિનિ
સર્વ વિધ શાસ્ત્ર વિરાડ્રૂપિણિ
સર્વ ચિત્તવૃત્તિ નિરોધકારિણિ
શુભ્ર વસ્ત્રધારિણિ શ્રદ્ધા ભક્તિં દેહિ મે ॥ ૨॥

રાજસ તામસ ભાવ કલુષનિવારિણિ

રાગ તાન પલ્લવિ શિખરારોહિણિ
પરામાનસ શાસ્ત્ર વિભેદિનિ
ગીતસુધા તોષિણિ શ્રદ્ધા ભક્તિં દેહિ મે ॥ ૩॥

## ૨૦ વાગ્દેવી ગીતમ્

મધુર વાગ્વિલાસ રઞ્જનીં
મધુર ભાવમેધયાન તોષિણીં
સ્મરામિ સતતં ધ્યાયામિ અનવરતમ્ ॥ પલ્લવિ॥

સઙ્ગીત સામ્રાજ્ય પાલનકરીં
સાહિત્ય સ્વારાજ્ય સ્પાપનકરીં
અન્યથા ગ્રહણહરાં શ્વેતામ્બરાં
અગ્રહણાપહરણ ચતુરાં
સ્મરામિ સતતં
ધ્યાયામિ અનવરતમ્ ॥ ૧॥

સરસિજોદ્ભવ સતીં સરસ્વતીં
સરસવતીં રસવતીં રતીં
વિદ્યાશ્રયાં સત્યાલયાં
વિક્ષિપ્ત ચિત્ત શુભોદયાં
સ્મરામિ સતતં
ધ્યાયામિ અનવરતમ્ ॥ ૨॥

## ૨૧ પર્વતી ગીતમ્

ચતુર્વેદ સામ્રાજ્ઞિ રક્ષ માં
ચતુર્દશ ભુવન જનનિ સંરક્ષ મામ્ ॥ પલ્લવિ॥

સચ્ચિદાનન્દરૂપિણિ નિરઞ્જનિ
નિત્ય શુદ્ધ બુદ્ધ મુક્તરૂપિણિ
દેવ વ્યૂહ રક્ષિણિ દૈત્યગણ ધ્વંસિનિ
ધૈર્યસ્થૈર્ય દાયિનિ ગીતસુધારઞ્જનિ ॥ ૧॥

હિમગિરિ નન્દિનિ હરપ્રિયરમણિ

પણ્ડિત પામર પૂજા પ્રમોદિનિ
કેસરિવાહનિ કલિમલવિદૂરિણી
સત્કર્મ સદ્ભાવ સૌશીલ્યતોષિણિ ॥ ૨॥

ભક્તિભાવ માધુર્ય પ્રોલ્લાસિનિ
ષોડશાર્ચનાકૈઙ્કર્ય વરદાયિનિ
કૈલાસવાસિનિ કુમતિહારિણિ
શિવગણ નર્તન ગાયનાહ્લાદિનિ ॥ ૩॥

## ૨૨ દક્ષિણામૂર્તિ ગીતમ્

રાજયોગ ચક્રવર્તિ કૃપયા મામવ
દક્ષિણામૂર્તિ ગુરુમૂર્તિ મામવ ॥ પલ્લવિ॥

માતઙ્ગ ચર્મામ્બર હે શઙ્કર
ભસ્માઙ્ગરાગધર ત્રિશૂલધર
કૈલાસેશ્વર ગૌરીમનોહર
જટાજૂટધર પાપદહનકર ॥ ૧॥

અદ્ભુતગાત્ર હે પરમપવિત્ર
મદનાન્તક હે લલાટ નેત્ર
ષણ્મુખ ગજમુખ લીલાવિહાર
પન્નગહાર શિષ્યોદ્ધાર ॥ ૨॥

બ્રહ્મતત્વ પ્રતિપાદકોઽસિ
અદ્વૈતાનુભવ પ્રસારકોઽસિ
સર્વત્ર માં કુરુ યોગયુક્તં
પ્રસન્નાત્મા કુરુ માં નિજભક્તમ્ ॥ ૩॥

## ૨૩ લક્ષ્મી ગીતમ્

વૈકુણ્ઠ નિલયે વાત્સલ્યહૃદયે
પાહિ માં દુગ્ધસાગર તનયે ॥ પલ્લવિ॥

વિષ્ણુ મનોહરિ ચન્દ્રસહોદરિ
સત્યાનન્દકરિ સદાભયકરિ

કમલકુસુમહસ્તે રક્તામ્બરિ
કમલાસનસ્થિતે વિશ્વમ્ભરિ ॥ ૧॥

મહિમાતિશય રૂપ લાવણ્યવતિ
કાન્તિવતિ શાન્તિમતિ રતિ સુમતિ
લોકમાતે ગીતસુધાચન્દ્રિકે
અભીષ્ટદાતે અણુમહદ્દીપિકે ॥ ૨॥

જડલક્ષ્મિ રૂપેણ દ્રવ્યરાશિવ્યાપિનિ
ચેતનલક્ષ્મિ ત્વં જીવકોટિજનનિ
અષ્ટલક્ષ્મિરૂપિણિ સર્વશક્તિપ્રદે
ઋષીન્દ્ર મુનીન્દ્ર પૂજ્યે મુક્તિપ્રદે ॥ ૩॥

## ૨૪ શિવગીતમ્

સમાધિ વલ્મીકે શિવ પરમાનન્દ
માં યોગસ્થં કુરુ નિજાનન્દ ॥ પલ્લવિ ॥

નવભાવ નયનાશ્રુ સઙ્ગમે ત્વાં
હૃદયાકાશે કથં પશ્યામિ
બહુજન્મ કૃતયોગ ફલપ્રદ
કુરુ માં તપોપ્રિયં આચાર્યેન્દ્ર ॥ ૧॥

કારુણ્ય સાગર ત્યાગિ યોગિ વિરાગિ હર
જ્ઞાનગઙ્ગાધર પ્રણવ ગીતસુધાકર
ૐ નમશ્શિવાય ઇતિ પઞ્ચાક્ષરાઃ
તવ દિવ્યમન્ત્રાઃ તવ યૌગિક તન્ત્રાઃ ॥ ૨॥

## ૨૫ માધવ ગીતમ્

દેદીપ્યમાન જ્યોતિસ્વરૂપ
ધ્યાનદર્શિત સગુણસ્વરૂપ ॥ પલ્લવિ ॥

વેદ સૃષ્ટિકારણ શ્રી માધવ
વેદમન્ત્ર શક્તિપ્રદ શ્રી કેશવ
સમ્યગ્જીવન પ્રદ શ્રીધર

સમ્યગ્દર્શન કારણ શ્રીકર ॥ ૧॥

ધર્મક્ષેત્ર પરિરક્ષણાર્થં
કર્મક્ષેત્ર સંવિધાનાર્થં
યુગયુગે ત્વં મર્ત્યલોકે
દિવ્ય માનુષીમ્ તનુમાશ્રિતઃ ॥ ૨॥

ગીતાચાર્ય હે જીવહિતકર
ગીતામૃત લોલ વેણુગાનચતુર
હે વિશ્વગુરુ શરણાગતોદ્ધાર
પ્રસીદ પ્રસીદ કૃપાસાગર ॥ ૩॥

## ૨૬ મુરલીધર ગીતમ્

ભુવનૈક સમ્મોહનાકારં
શિરસા નમામિ મુરલીધરમ્ ॥ પલ્લવિ॥

દેવકી વસુદેવ પ્રિય કિશોરં
યશોદાનન્દ ચિત્તાપહરં
કાલુષ્યદૂરમ્ વિશ્વાધારં
કારુણ્યપૂરં વિશ્વાકારમ્ ॥ ૧॥

તુલસીમાલાધરં જીવેશ્વરં
સખવૃન્દ નાયકમ્ નવનીતચોરં
રાસલીલાલોલં જ્ઞાનેશ્વરં
ગીતસુધાલોલં યોગેશ્વરમ્ ॥ ૨॥

## ૨૭ ગોપાલ ગીતમ્

ગોવર્ધન ગિરિધર ગોપાલ
ત્રાહિ માં અષ્ટદિક્પાલક પાલક ॥ પલ્લવિ॥

નીલમેઘશ્યામ વૈકુણ્ઠધામ
શ્રી વિષ્ણુમૂર્તિ પુરુષોત્તમ
વારિરુહ શઙ્ખ ચક્ર ગધાધર
શેષતલ્પ શયન પીતામ્બરધર ॥ ૧॥

વિશ્વ સૃજન પાલન લય કારણ
વૈનતેય ગમન શ્રીદેવી રમણ
તત્ત્વદર્શિ નિર્ગુણ સૂક્ષ્મદર્શિ ચિદ્ઘન
ગુણદર્શિ ગુણાતીત ગીતસુધા રઞ્જન ॥ ૨॥

## ૨૮ શ્રીરામ ગીતમ્

શ્રી રામચન્દ્ર વાત્સલ્યસાન્દ્ર
રઘુકુલ પીયૂષસાગર ચન્દ્ર ॥ પલ્લવિ॥

ધરાસુતા વલ્લભ રવિપ્રભ
સુગુણૈશ્વર્ય ભિક્ષાં દેહિ
ગમ્ભીરસ્વભાવ સર્વાત્મભાવ
દશરથ પ્રાણપ્રિય ઇનકુલોદ્ભવ ॥ ૧॥

નિત્યસમીપવર્તિ મારુતીસેવ્ય
સર્વં રામમયમિત્યનુભવવેદ્ય
નવવિધ ભક્તોપાસ્ય કોદણ્ડધર
અયોધ્યા સાર્વભૌમ લઙ્કાધીશહર ॥ ૨॥

જનકવચન પરિપાલકરામ
જનકનન્દિની સૌમિત્રી સમેત
વિપિનવાસે સુખદુઃખ સમદર્શિ
ગીતસુધાશ્રય હે સત્યદર્શિ ॥ ૩॥

## ૨૯ શ્રીધર ગીતમ્

ક્ષીરાબ્ધિ સુકુમારિ મનોહર
ક્ષીરામ્બોનિધિ મથનાધાર ॥ પલ્લવિ॥

સર્વકરણ સુન્દર શાન્તાકાર
સર્વજીવેશ્વર લોકોદ્ધાર
સમસ્ત ચરાચર સ્વરૂપધર
ત્રિમૂર્તિ રૂપ સદ્ગુરુ દામોદર ॥ ૧॥

ધર્મક્ષેત્ર સઞ્ચાર સુજનમન્દાર
વેદજ્ઞાનસાર શ્રીધર મુદકર
અસુરસંહાર ગુણગમ્ભીર
પ્રણમામ્યહમ્ ત્વાં ગીતસુધાકર ॥ ૨॥

## ૩૦ વાસુદેવ ગીતમ્

દામોદરં રુક્મિણી મનોહરં
ભાવયામિ વસુદેવ સુકુમારમ્ ॥ પલ્લવિ ॥

સહસ્રારાદ્રિ યોગિસદ્દર્શિતં
ચિદ્ગુહાન્તર્નિવાસિતમ્ સ્મિતં
સહસ્ર કોટિ ભાનુપ્રકાશં
સાધુસન્ત સદ્ભક્ત હૃદયેશમ્ ॥ ૧॥

યાદવકુલેશં શુભદાયકં
વૈકુણ્ઠધામેશં દીનોદ્ધારકં
દૈવશિખામણિં પ્રાજ્ઞચિન્તામણિં
ધર્મકર્મ મર્મજ્ઞસુધીમણિમ્ ॥ ૨॥

શ્યામલ શરીરં માતુલ કંસહરં
વ્યાકુલ ચિત્ત પાણ્ડવોદ્ધારં
ગીતસુધાકરં વેણુગાનચતુરં
ગીતામૃત દોગ્ધાં મોહાપહરમ્ ॥ ૩॥

## ૩૧ વરલક્ષ્મી ગીતમ્

મલ્લિકા ચમ્પકા સેવન્તિકા
માલિકાલઙ્કૃતા હરિપદસેવિકા ॥ પલ્લવિ ॥

ભક્તધેનુકા કૃપાચન્દ્રિકા
સંરક્ષયતુ માં ભવતારકા
સમૃદ્ધિવાટિકા સમ્પોષિણી
સર્વસિદ્ધિકારિણી ગીતસુધાવની ॥ ૧॥

સુગન્ધમય સરોરુહધારિણી

સુકોમલારુણ હસ્તશોભિની
શ્રીવરલક્ષ્મી વૈકુણ્ઠસ્વામિની
ક્ષીરાબ્ધિમથને જન્મધારિણી ॥ ૨॥

શુક શૌનક તુમ્બુરુ નારદાદિ
મુનિ યોગિ ગણ સઙ્કીર્તિતા
સિદ્ધ સાધ્ય યક્ષ કિન્નર કિંપરુષ
ગન્ધર્વ દેવાસુર વૃન્દસેવિતા ॥ ૩॥

## ૩૨ ગૌરી ગીતમ્

ચતુર્દશ ભુવન જનનિ નમસ્તે
કૈલાસવાસિનિ ગૌરિ નમસ્તે ॥ પલ્લવિ॥

તાણ્ડવ પ્રિય પરશિવસહિતે
લાસ્યપ્રિયે જીવપાત્રમુદિતે
પ્રકૃતિપુરુષ સઙ્ગમબલેન
ત્વં વિશ્વપાલિનિ વિશ્વરક્ષિણિ ॥ ૧॥

ગજવદન ષડ્વદન ધીબલ પ્રહર્ષિણિ
ત્રિશૂલધારિણિ ત્રિનેત્રભામિનિ
ભૃઙ્ગિ નન્ધ્યાદિ શિવગણવિનુતે
સ્તોત્રસંપ્રીતે ગીતસુધાશ્રિતે ॥ ૨॥

## ૩૩ કેશવ ગીતમ્

સનાતન ધર્મસારથિં સ્મર
ક્ષીરસાગર રાજસુતાપતિં સ્મર ॥ પલ્લવિ॥

કરણવ્યૂહં સંયમ્ય પ્રતિદિનં
કાયરથે સ્મર આત્માનં રથિનં
સુદુષ્કર મનોગતિં નિયમ્ય
કેશવ ચરણાબ્જે મન આધત્સ્વ ॥ ૨॥

શિષ્ટજન પરિરક્ષકં દુષ્ટજન શિક્ષકં
વિશિષ્ટ યોગાર્થિ પરિવર્તકં

જીવનિયામકમ્ જગન્નિયન્ત્રકં
જગદોદ્ધારકં સ્મર ગીતસુધારક્ષકમ્ ॥ ૨॥

## ૩૪ વિષ્ણુ ગીતમ્

વન્દેઽહં શ્રી મહાવિષ્ણું
જિષ્ણું પ્રભવિષ્ણું ગ્રસિષ્ણુમ્ ॥ પલ્લવિ॥

વન્દે સરોરુહનાભં અન્તર્મુખ સુલભં
શ્યામલપ્રભં શ્રી સત્યનારાયણં
નલિનલોચનં હૃદયાકર્ષણં
વન્દે નાગકુલાધીશ શયનમ્ ॥ ૧॥

મહિમાન્વિત સુદર્શન ચક્રધરં
અતિશય બલપૂર્ણ ગધાધરં
ગીતસુધાપાવનં સચ્ચરિત ભયહરણં
ધ્યાન ગાન યોગ યાત્રા તોષણમ્ ॥ ૨॥

## ૩૫ સરસ્વતી ગીતમ્

શારદે વરદે માં જ્યોતિર્ગમય
શ્વેતહંસગામિની સુપથે ગમય ॥ પલ્લવિ॥

નીરક્ષીર વિવેકં પ્રયચ્છ
કલાદેવિ આત્મસુખં પ્રયચ્છ
જપમાલા પુસ્તકધારિણિ વાણિ
વિદ્યાસમ્પદ્બલં મે યચ્છ ॥ ૧॥

નાદસુરઙ્ગે પ્રજ્ઞાં સ્થાપયસિ
સ્વર તરઙ્ગે રસલોકે વિહરસિ
અક્ષરાન્તરઙ્ગે ભાવલાસ્યં કરોષિ ।
અક્ષય ગીતસુધાસરિતા પ્રિયોઽસિ ॥ ૨॥

## ૩૬ દક્ષિણામૂર્તિ ગીતમ્

હે દક્ષિણા મૂર્તિ બોધય માં
હે જ્ઞાનવિજ્ઞાન મૂર્તિ પ્રેરય મામ્ ॥ પલ્લવિ ॥

રાજયોગ વિદ્યા રહસ્યં
વિશ્વાદિગુરુમૂર્તિ ત્વયા જ્ઞાતં
હે જ્ઞાનવૃદ્ધ ભવરોગવૈદ્ય
સર્વગુરુવન્દ્ય ઋષિમુનિવેદ્ય ॥ ૧॥

હે જીવાધાર જીવનાધાર
વેદવેદાન્ત સાર નિગમગોચર
જનન મરણ તારણચતુર
સર્વદા ધ્યાનસ્થ યોગભાસ્કર ॥ ૨॥

## ૩૭ શ્રીકૃષ્ણ ગીતમ્

અન્યથા શરણં નાસ્તિ શ્રીનિધિ
પયોનિધિવાસ કૃપાનિધિ ॥ પલ્લવિ ॥

અક્ષયામ્બરપ્રદ યદુવંશતિલક
પાણ્ડવ રમણી માનસંરક્ષક
ષોડશ સહસ્ર ગોપિકાવિમોચક
ષોડશ કલાપૂર્ણ કુબ્જ વનિતોદ્ધારક ॥ ૧॥

દેવકી વસુદેવ ત્યાગયોગાશ્રય
રાધા રુક્મિણી પ્રેમયોગમોદાશ્રય
વેણુગાનપ્રિય અક્ષયાવ્યય
ગીતાબોધક ગીતસુધાપ્રિય

## ૩૮ સરસ્વતી ગીતમ્

શુભઙ્કરિ અભયઙ્કરિ વીણાપાણિ
સૃષ્ટિકર્મ સંલગ્ન બ્રહ્મરમણિ ॥ પલ્લવિ ॥

અજ્ઞાત વાસ સ્થિત સંસ્કારાન્
સુજ્ઞાત વિધાનેન નિયન્ત્રસિ

વિધવિધ સ્પન્દન વિજ્ઞાન ચન્દ્રિકે
ત્વમેવ જ્ઞાનપ્રદે પ્રજ્ઞાદીપિકે ॥ ૧॥

વાગ્દોષ વારિણિ લોકમૈત્રિ રક્ષિણિ
સર્વાક્ષર માલિનિ અભિવ્યક્તિકારિણિ
સઙ્ઘર્ષસમયે સુપથદર્શિનિ
સંપ્રાપ્તિ સમયે યશોકીર્તિ દાયિનિ ॥ ૨॥

સર્વ સ્પન્દન માધુર્ય પ્રહર્ષિણિ
નૃત્ય ગાન સાહિત્ય ક્ષેત્રપોષિણિ
ચિત્ર શિલ્પ વૈભવ સૌન્દર્યમયિ
જપમાલાધારિણિ ગીતસુધામયિ ॥ ૩॥

## ૩૯ રાજરાજેશ્વરી ગીતમ્

ત્રિભુવનોલ્લાસિનિ માં પાહિ
ત્રિદેહ સઞ્ચાલિનિ જ્ઞાનં દેહિ ॥ પલ્લવિ॥

શ્રીરાજ રાજેશ્વરિ ભક્તિદે
શ્રીમત્સિંહાસનાસીને મુક્તિદે
શ્રીમાતે જડચેતનાત્મિકે
શ્રીયુતે સગુણ નિર્ગુણાત્મિકે ॥ ૧॥

પરાપરા વિદ્યાપ્રકાશિનિ
ગીતસુધાવનિ સિંહવાહનયુતે
શ્રીહરિ ચતુરાસ્ય ગજાસ્યપિત નુતે
રક્તબીજાસુર્મર્દનમુદિતે દૈત્યમર્દિનિ ॥ ૨॥

## ૪૦ શ્રીહરિ ગીતમ્

લીલામાનુષ વિગ્રહ શ્રીહરિ
લક્ષ્મીરમણ પ્રસીદ મુરારિ ॥ પલ્લવિ॥

વિશ્વસ્વામ્યં તવૈવ સર્વદા
જીવસામ્યં ત્વય્યૈવ ગોવિન્દ
તવ સમક્ષમતાનુભવે મમ

પ્રજ્ઞાં પ્રતિષ્ટાપય સુખધામ ॥ ૧॥

સનક સનન્દનાદિ ઋષિસેવિત
ધૃવ પ્રહ્લાદ વિભીષણાદ્યર્ચિત
સફલ જપયોગધ્યેય ગીતસુધાકર
શઙ્ખચક્રધર ધરણીપ્રિયકર ॥ ૨॥

## ૪૧ પાર્વતી ગીતમ્

ભગવતીં બલવતીં પાર્વતીં સ્મરામ્યહં
ધીમતીં શ્રીમતીં શાશ્વતીં ભજામ્યહમ્ ॥ પલ્લવિ ॥

ધર્મવતીં દયાવતીં હૈમવતીં હંસવતીં
સુમુખ સ્કન્ધ સમ્પૂજિત શિવસતીં સ્મરામ્યહમ્ ॥ ૧॥

નીતિમતીં કાન્તિમતીં માનવતીં ભાનુમતીં
અનુપમ લાવણ્યવતીં હ્રીમતીં સ્મરામ્યહમ્ ॥ ૨॥

રસવતીં સરસવતીં મધુમતીં શાન્તિવતીં
ગીતસુધાશ્રિતાં રતીં ગુણવતીં સ્મરામ્યહમ્ ॥ ૩॥

## ૪૨ વિઘ્નરાજ ગીતમ્

વિઘ્નરાજં સુમતિપ્રદાયકં
પ્રણમામિ સદા માતઙ્ગમુખમ્ ॥ પલ્લવિ ॥

નવરત્ન કિરીટ વિરાજિતં
ભુજગ ભુજકીર્તિ શોભિતં
મૂષકગમનં મોદકરં
પ્રણમામિ દુરિતરાશિહરમ્ ॥ ૧॥

પ્રથમારાધિતં ગિરિજાશિવસુતં
લલાટે પ્રણવતિલક રાજિતં
સિદ્ધિ બુદ્ધિપ્રદં ગીતસુધાનુતં
પ્રણમામિ કુમારક્રીડાસહિતમ્ ॥ ૨॥

## ૪૩ સરસ્વતી ગીતમ્

નાદસાગરે સમસ્વર તરઙ્ગિણિ
ભાષાન્તર્ગામિની સર્વાક્ષરાકારિણિ ॥ પલ્લવિ ॥

વિદ્યાપ્રદે શારદે વરદે
સર્વપદાર્થ જ્ઞાનવિજ્ઞાનદે
સૃષ્ટિકર્ત ભામિનિ જ્ઞાનં દેહિ
સત્યલોક સ્વામિનિ માં પરિપાહિ ॥ ૧ ॥

જીવાન્તરઙ્ગે શાશ્વતવાસિનિ
જીવનતરઙ્ગે તરતમવિવેચનિ
મૂઢત્વદૂરિણિ ભવભીતિ હારિણિ
ગીતસુધાવનિ સત્યપ્રકાશિનિ ॥ ૨ ॥

## ૪૪ પાર્વતી ગીતમ્

અનુપમ લાવણ્યપૂર્ણે ગિરિસુતે
અપરિમિત શક્તિયુતે સ્કન્દમાતે ॥ પલ્લવિ ॥

સિદ્ધિશક્તિરૂપિણિ સર્વસિદ્ધિકારિણિ
તપસ્વિનિ તેજસ્વિનિ ગીતસુધાવનિ
અદ્ભુત દીક્ષાવ્રતે દક્ષનન્દિનિ
અર્ધનારીશ્વર પરમપ્રિયરમણિ ॥ ૧ ॥

સ્વહસ્તરૂપિત ગજમુખ જનનિ
સ્વધર્મનિષ્ઠ શીઘ્રોદ્ધારિણિ
દૈવાસુર સઙ્ગ્રામે શિષ્ટરક્ષિણિ
ગઙ્ગાનુબન્ધે સ્નેહરાગહર્ષિણિ ॥ ૨ ॥

## ૪૫ લક્ષ્મી ગીતમ્

સદ્ભક્તિ મધુસ્વાદપ્રિયે સહૃદયે
સિન્ધૂર તિલક શોભિતે હરિપ્રિયે ॥ પલ્લવિ ॥

સર્વભોગ સત્યયોગ પ્રદાયિનિ

સર્વકાલ હાસિનિ સરોજલોચનિ
સમ્પત્પ્રદાયિનિ હ્રાસદૂરિણિ
મહાલક્ષ્મિ સદયે ગીતસુધામોદિનિ ॥ ૧॥

સર્વાભરણ સુન્દરિ મોદકરિ પાવનકરિ
સૌન્દર્ય રત્નાકરિ ભુવનેશ્વરિ
સઞ્ચિત કર્મરાશિ દહનકરિ
સંરક્ષ માં સદા નિત્યાભયકરિ ॥ ૨॥

## ૪૬ રાજરાજેશ્વરી ગીતમ્

શ્રીમાતે રાજરાજેશ્વરિ
શ્રી લલિતે ભુવનૈકાધીશ્વરિ ॥ પલ્લવિ ॥

સત્ય શિવ સુન્દરરૂપિણિ પાલય
સત્ય જ્ઞાનાનન્તરૂપિણિ તારય
ઇહ પર સૌખ્યાર્થમહં વારં વારં
ઇક્ષુચાપધરિ ત્વાં પ્રણમામ્યહમ્ ॥ ૧॥

જન્મ મૃત્યુ વૃત્તે ભ્રમતિ મમ જીવઃ
તન્મયકર વિષયજાલે બન્ધિતોઽસ્મિ
અવિદ્યા ગુહે કથં પશ્યામિ પ્રકાશં
આરાધક પાવનિ ગીતસુધા તારિણિ ॥ ૨॥

## ૪૭ શ્રી લલિતા ગીતમ્

શ્રી વિદ્યારાધ્યે દિવ્યશક્તીશ્વરિ
શ્રી ચક્રનિલયે ભવ્ય જગદીશ્વરિ ॥ પલ્લવિ ॥

પરાપ્રકૃતિરૂપે જ્ઞાનપ્રસાદિનિ
અપરા પ્રકૃતિરૂપે જીવભાવદાયિનિ
ષડ્વિકારમય દેહભાવહારિણિ
સવ્યપથ ચાલિનિ મોક્ષસુખદાયિનિ ॥ ૧॥

દિવિજ કાર્ય સમુદ્ભૂતે શ્રી લલિતે
દીપ્તિ લાવણ્ય સમન્વિતે પાહિ માં

રાજીવ લોચનિ ગીતસુધાવાહિનિ
પઞ્ચવિષય સાક્ષિણિ પ્રજ્ઞાપ્રબોદિનિ ॥ ૨॥

## ૪૮ મારુતી ગીતમ્

વન્દે સુધીવરં ધીરવરં
અઞ્જનાદેવી પ્રિયકુમારમ્ ॥ પલ્લવિ॥

જાનકીરામ સેવા નિષ્ઠ દૂતં
ગગનયાન સમર્થમ્ પ્રણીતં
યોગસિદ્ધીશ્વરં મહાસન્તં
વાનરેશં અપરિમિત બલવન્તમ્ ॥ ૧॥

લઙ્કેશ ગર્વહરં ભક્તિપૂર્ણં
દિવિજવૃન્દ ગણદત્ત દિવ્યશક્તિપૂર્ણં
સેતુનિર્માણે ગીતસુધાશ્રિતં
સર્વદા રામનામ સ્મરણનિરતમ્ ॥ ૨॥

## ૪૯ નારાયણ ગીતમ્

મધુસૂદન જગદોલ્લાસ કારણ
પુનરપિ પુનરપ્યાશ્રયામિ ॥ પલ્લવિ॥

શ્રીમન્નારાયણ મોક્ષસદન
શ્રી લક્ષ્મીરમણ જીવપ્રદાન
કમલપત્ર નયન નલિનચરણ
શ્રીરઙ્ગધામેશ્વર શશિવદન ॥ ૧॥

મત્સ્ય કૂર્મ વરાહ નરસિંહ વામન
પરશુરામ રામ કૃષ્ણ બુદ્ધ કલ્કિ
ઇત્યાશ્ચર્યમય દશાવતારેષુ
ધર્મપ્રભાકર હે ગીતસુધાશ્રિત ॥ ૨॥

## ૫૦ આઞ્જનેય ગીતમ્

સુરુચિર ભક્તિગાન વિદ્યાધર
વાયુદેવનન્દન ભક્તિં દેહિ ॥ પલ્લવિ ॥

સઙ્કટમોચન ભીતિહરણ
રામનામજપે વિલીન પ્રાણ
દેવેન્દ્રાદિ દિવિજગણ સન્નુત
અણિમા મહિમા સિદ્ધિશક્તિ સંયુત ॥ ૧॥

શિવાંશ સમ્ભૂત ભક્તાગ્રેસર
ગીતસુધાનુત અસુરભયઙ્કર
ત્રિમૂર્તિ વરદાન પાત્ર ગુણવન્ત
વાનરવીર દિવ્યગાત્ર ધીમન્ત ॥ ૨॥

## ૫૧ આઞ્જનેય ગીતમ્

ભાગવત શિરોમણિ માં પાહિ
શ્રી આઞ્જનેય સદ્ભક્તિં દેહિ ॥ પલ્લવિ ॥

શ્રીરામભક્ત સાર્વભૌમ
શ્રીમાતા સીતાન્વેષણ ચતુર
સઞ્જીવિની પર્વતધર શુભકર
સમ્યગ્સેવા પરાયણ ધીવર ॥ ૧॥

બાલ્યાવસ્થે બહુલીલાવિનોદ
પ્રૌઢાવસ્થે અતિમાનુષ પ્રતાપ
દિવિજદૈત્યાતીત શક્તિસંયુક્ત
ગીતસુધાનિરત ચિરઞ્જીવિ મુક્ત ॥ ૨॥

## ૫૨ ગણેશ ગીતમ્

એકદન્તં પ્રથમારાધિતં
ભાવયામ્યહં શ્રીગણનાથમ્ ॥ પલ્લવિ ॥

મૂલાધારસ્થિતં વિઘ્નેશં

મોદકહસ્તં સુધીશં ગુણેશં
સહસ્ર ભાનુપ્રકાશં વિશેષં
પાશાઙ્કુશધરમ્ પાતકનાશમ્ ॥ ૧॥

પરા પશ્યન્તી મધ્યમા વૈખરી
ચત્વારિ વાગાત્મકં ગજમુખં
ગીતસુધાકરં વિદ્યાધીશ્વરં
શિવકુમારં કાર્તિકેય સોદરમ્ ॥ ૨॥

## ૫૩ કાર્તિકેય ગીતમ્

કાર્તિકેય વિઘ્નરાજપ્રિય
દેવસૈન્યાધિપ ગઙ્ગાતનય। ॥ પલ્લવિ॥

ઉમા મહેશસુત દિવ્યપ્રભ
વલ્લી દેવસેના પ્રિયવલ્લભ
તારકાસુર સંહારક
સત્સન્તાન વર પ્રદાયક ॥ ૧॥

ગુરુમૂર્તિ સ્વરૂપ સુન્દરમુખ ષણ્મુખ
પલની ક્ષેત્રેશ કૃત્તિકારાધક
મયૂરવાહન ગીતસુધાવન
પ્રજ્ઞાપૂર્ણ દેહિ સુજ્ઞાનમ્ ॥ ૨॥

બાલ સુબ્રહ્મણ્ય વિદ્વત્પૂર્ણ
વેલાયુધધર તેજો પૂર્ણ
મમ સુપ્રસન્નો ભવ જ્ઞાનપૂર્ણ
વ્યાધિહર ભવવ્યાધિહર પરિપૂર્ણ ॥ ૩॥

## ૫૪ શ્રીરામ ગીતમ્

નિરતિશય ગુણસાગરચન્દ્ર
વન્દેઽહં શ્રીરામચન્દ ॥ પલ્લવિ॥

વિષ્ણુમૂર્તિ વિશ્વાદિદેવ
ધર્મમૂર્તિ કારુણ્યભાવ

મર્યાદા પુરુષોત્તમ રામ
સનાતન સન્તપ્રિય રઘુરામ ॥ ૧॥

અયોધ્યાનગર પ્રજાસુખ કારણ
સુમિત્રાસુતાનુક્ષણ સેવનકારણ
ભરત શતૃઘ્નાદિ સોદરસમ્પૂજ્ય
સીતામનોહર ગીતસુધારાધ્ય ॥ ૨॥

## ૫૫ ગૌરી ગીતમ્

શ્વેતશૈલપતિ પ્રિયનન્દિની
શુક્લામ્બરધર ગણેશ જનની ॥ પલ્લવિ॥

કૃત્તિકા પોષિત સ્કન્દ રઞ્જિની
કૈલાસવાસિની ગૌરી અવતુ માં
ષડ્વૈરિ દમની ષડ્ચક્રવાસિની
ષડૈશ્વર્ય શાલિની અવતુ મામ્ ॥ ૧॥

સુવાસિનિ સમ્પૂજ્ય કુણ્ડલિની
સમ્પ્રીતા ભવતુ ગીતસુધાવની
ધર્મગ્લાનિ કારક દૈત્યમર્દિનિ
સત્કર્મરત સંરક્ષિણી અવતુ મામ્ ॥ ૨॥

## ૫૬ ગણેશ ગીતમ્

મનસા સ્મરામિ પશુપતિતનયં
ગણનાથં સદયં મહિમાતિશયમ્ ॥ પલ્લવિ॥

કોટિદિનકર પ્રકાશં પાવનચરણં
ભાલચન્દ્રં મહોદરં ગજાનનં
પ્રથમાર્ચન મુદિતં ભવભીતિ હરણમ્ ।
ભક્ત્યા કરોમિ મોદકનિવેદનમ્ ॥ ૧॥

વક્રતુણ્ડં લમ્બોદરં
ધીશક્તિપ્રદમ્ મઙ્ગલાકારં
ગજકર્ણકં ષણ્મુખાગ્રજં

ગીતસુધાકરં વિઘ્નરાજમ્ ॥ ૨॥

## ૫૭ વાસવિ ગીતમ્

ષોડશિ વાસવિ અતિલોક કાન્તિવતિ
હૃદયગુહાન્તરે ધ્યાયામિ ભગવતિ ॥ પલ્લવિ॥

બાલ્યક્રીડા લીલા વિલાસિનિ
કાવ્ય નાટ્ય સઙ્ગીત સમ્મોદિનિ
રસ ભાવ વિચાર સંયોગધ્યેયે
પ્રતિક્ષણં ભાવયામિ નિર્માયે ॥ ૧॥

પ્રસન્ન મનોદીપ્તિમ્ પ્રસારય
માં સર્વદા સુમેધા જ્યોતિર્ગમય
ધૈર્ય સ્થૈર્યાદિ સમ્પદાન્ પ્રસાદય
કૃત્વા મમ સારથ્યમ્ અમૃતં ગમય ॥ ૨॥

સર્વ શક્તિધારિણિ બ્રહ્મવિષ્ણુ શિવજનનિ
સર્વજીવ દેહયાત્રા વિધાયિનિ
સર્વભાવ ક્રિયા નિશ્ચય પ્રવર્તિનિ
ગીતસુધાવનિ વિશ્વરૂપ પ્રદર્શિનિ ॥ ૩॥

## ૫૮ ચન્દ્રમૌલેશ્વર ગીતમ્

ચન્દ્રમૌલેશ્વર અર્ધનારીશ્વર
જીવરહસ્યમ્ પ્રબોધય સ્મરહર ॥ પલ્લવિ॥

સમસ્ત બ્રહ્માણ્ડ પ્રભવ સ્થિતિ લય-
કર્તારં ત્વામૈવ નિરન્તરં સ્મરામિ
વ્યષ્ટિ રૂપાકારે અણુરૂપો ત્વં
સમષ્ટિ રૂપાકારે મહદ્રૂપો ત્વમ્ ॥ ૧॥

મયાકૃતાન્ શતશતાપચારાન્
ક્ષમસ્વ કૃપયા કૈલાસેશ્વર
સમાધિયોગે પરમાનન્દ
આત્મરતિં પ્રદ ગીતસુધાનન્દ ॥ ૨॥

## ૫૯ શ્રીરામ ગીતમ્

જાનકીકાન્ત અદ્ભુતચરિત
ત્વત્સમો નાસ્તિ ધીર ધીમન્ત ॥ પલ્લવિ ॥

અયોધ્યા સામ્રાટ્ મહાતેજસ્વિ
વને વલ્કલધારી અસમ તપસ્વિ
અસમાન પ્રેમનિધિ નિસ્સઙ્ગમૂર્તિ
નિરુપમ દયાનિધિ સુધર્મમૂર્તિ ॥ ૧ ॥

રઘુવંશ તિલક ભાનુકોટિ તેજ
પિતૃવાક્ય પાલક કૌસલ્યાત્મજ
ધર્મમર્યાદા પુરુષોત્તમ સત્યભાષિ
સત્કીર્તિત ગીતસુધાશ્રિત મૃદુભાષિ ॥ ૨ ॥

## ૬૦ નાદોપાસના પથમ્

નાદોપાસના પથં સક્ષાત્કારકં
ન કેવલં જ્ઞાપકં તુ પરિવર્તકમ્ ॥ પલ્લવિ ॥

સત્યાસત્ય સંશોધન પ્રેરણદાયકં
નિત્યાનિત્ય વિવેચન શક્તિ વર્ધકં
ધર્માધર્માચરણ ભેદબોધકં
ન્યાયાન્યાય નિર્ણયબલ પ્રેરકમ્ ॥ ૧ ॥

સમીર સુતાગસ્ત્ય નારદાદિ વેદ્યં
ત્યાગરાજ દીક્ષિત શ્યામકૃષ્ણારાધ્યં
વાલ્મીકિ લવકુશાસ્વાદિતં
રાગતાનમુદિતં ગીતસુધાસાધિતમ્ ॥ ૨ ॥

કાય કરણ મૈત્રિસાધકં કલારાધનં
કરણ પ્રાણ સખ્યસાધકં નાદોપાસનં
ઇચ્છાશક્તિ જ્ઞાનશક્તિ ક્રિયાશક્તિ સમ્મિલનં
રસઋષિ દર્શિત પવિત્રભાવોદ્દીપનં કલાવન્દનમ્ ॥ ૩ ॥

દેહેન્દ્રિય મનો બુદ્ધિ વાદ્યૈઃ મધુર વાદનં
સુશ્રાવ્ય સપ્તસ્વર રાગ તાન પલ્લવ્યાલાપનં
સર્વાક્ષર સશક્ત બીજમન્ત્ર પઠને દેવદર્શનં
સર્વ દેવનમન ક્રિયાચરણે દ્વૈતભાવ દૂરીકરણમ્ ॥ ૪॥

## ૬૧ મારુતી ગીતમ્

સુવીરં સુધીરં સુધીવરં
શૂરં ભવતરણ ચતુરં સ્મરામિ ॥ પલ્લવિ॥

અઘરાશિહરં આજન્મ બલશાલિં
અઞ્જના કેસરિકુમારં મનસા સ્મરામિ
અપૂર્વ ગુણ બલ સ્થૈર્યસંયુતં
સીતારામ પદકુમુદ સ્થિતમ્ ॥ ૧॥

રામનામ વૈભવ મહિમાનિરતં
અશ્રુ સ્વેદ કમ્પનયુત ગાનરતં
યોગસિદ્ધીશ્વરં ભક્તિનિધીશ્વરં
ગીતસુધાકરં કપીશ્વરં મનસા સ્મરામિ ॥ ૨॥

## ૬૨ ગૌરી ગીતમ્

સુરુચિર વિદ્યાં દેહિ મે ગૌરિ
મનોરથ પ્રદે માહેશ્વરિ ॥ પલ્લવિ॥

અન્તર્યાગ નિષ્ઠારાધિતે લલિતે
અન્તર્યામિનિ આદ્યન્તરહિતે
અન્તસ્સાગર તરઙ્ગ સાક્ષિણિ
અન્તર્બોધિનિ સ્થિરચિત્તપાલિનિ ॥ ૧॥

આત્મ સિંહાસનાસીને સ્મિતવદને
આત્મતત્વ પ્રકાશમય દયાલોચને
અર્પિત ચતુરન્તઃકરણ કાન્તિમયિ
આર્જિત બલરક્ષિણિ ગીતસુધામયિ ॥ ૨॥

## ૬૩ શ્રીધર ગીતમ્

હે પુરુષોત્તમ કરુણાક્ષ શ્રીધર
હે પરમગુરો મમ ચક્ષુરુન્મીલય ॥ પલ્લવિ ॥

ગુરુપ્રવચને તુ નવ નવ પાઠં
પરિચિત પદવ્યૂહે અપરિચિત ભાવં
અનુદિનાભ્યાસે નવનવાન્તરાયાઃ
સાધકવત્સલ તાન્ નિવારય ॥ ૧ ॥

ક્ષણિક સુખરઙ્ગે ન રમતે જ્ઞાની
નિત્યસુખાન્વેષણે તુષ્યતિ યોગિ
તવ પદકમલે ભૃઙ્ગોઽસ્મિ કેશવ
ગીતસુધા પ્રિય હે ગોવિન્દ માધવ ॥ ૨ ॥

## ૬૪ ચિદ્રૂપિણી ગીતમ્

ચિદગ્નિ સમુદ્ભવે પરશિવે
ચિન્તિત ફલપ્રદે દયાર્ણવે ॥ પલ્લવિ ॥

અસક્તિ યોગ ગઙ્ગાવાહિનિ જનનિ
અવીદ્યારૂપિણિ જીવસમ્મોહિનિ
સમચિત્તત્વં પ્રસાદય વિશ્વવ્યાપિનિ
શમદમૌશક્તિં પ્રયચ્છ ધીપ્રકાશિનિ ॥ ૧ ॥

અનુદિનં તવ સ્વાદુનામાર્ચનં
અર્પિતભાવે કરિષ્યે સઙ્કીર્તનં
સમસ્ત દિતિતનુજ સમૂહધ્વંસિનિ
શર્વાણિ કલ્યાણિ ગીતસુધામોદિનિ ॥ ૨ ॥

## ૬૫ ભારતી ગીતમ્

ભારતીં ધીમતીં રસસરસ્વતીં
ભક્ત્યા ભજામિ ચતુરાસ્યસતીમ્ ॥ પલ્લવિ ॥

પ્રતિભાવે પ્રતિસ્પન્દને મમ વિકસને

પ્રતિ વિચારે પ્રતિક્રિયે મમ ગ્રહણે
તવ કૃપાદૃષ્ટિરેવ યશસ્કરં
તવ નવસૃષ્ટિરેવ દીપ્તિકરમ્ ॥ ૧॥

પ્રતિભોદ્દીપિનીં ત્વાં ભજામિ
કલા તરઙ્ગિણીં નવરસવર્ષિણીં
જીવ શુદ્ધિકારિણીં ભજામિ જનનીં
લલિત કલાસ્વાદિનીમ્ વિદ્યાસઞ્જીવિનીમ્ ॥ ૨॥

શ્વેતવસ્ત્રધારિણીં સંશયચ્છેદિનીં
કચ્છપિ વીણા વાદનાનુરઞ્જિનીં
હૃદય પુસ્તકાધ્યયન ગુરુકુલે
જીવભાવત્યાગાર્થં ત્વાં ભજામિ ॥ ૩॥

## ૬૬ ત્રિપુરસુન્દરિ ગીતમ્

શ્રીમદ્ત્રિપુરસુન્દરિ શ્રીકરિ
શ્રીમત્સિંહાસનાધીશ્વરિ રક્ષ મામ્ ॥ પલ્લવિ॥

હ્રીઙ્કાર તરુવલ્લરિ ત્રિપુરેશ્વરિ
લોકોત્તર સૌન્દર્ય રત્નાકરિ
ઇક્ષુ ચાપ પાશાઙ્કુશધરિ અભયઙ્કરિ
ઇન શશિ નયન કાન્તિધરિ મોદકરિ ॥ ૧॥

દશપ્રાણ સ્પન્દનકારિણિ માહેશ્વરિ
ચરાચરાત્મિકે સર્વ રક્ષાકરિ
ધર્મકર્મ નિષ્ઠાવ્રત વરાભયકરિ
ચારિત્ર્ય રક્ષાકરિ ગીતસુધાકરિ ॥ ૨॥

## ૬૭ પઞ્ચાયતન પૂજા

પઞ્ચાયતન પૂજાં કુરુ હે ગૃહસ્થિ !
પાઞ્ચભૌતિક ત્રિદેહશુદ્ધિં કુરુ ॥ પલ્લવિ॥

ભાસ્કરોપાસનેન તનુસ્વાસ્થ્યં
વિઘ્નેશ્વરાર્ચનેન સર્વકાર્ય સિદ્ધિઃ

પરામ્બિકારાધનેન ઇહપરફલપ્રાપ્તિઃ
શિવચરણસેવ્યા જ્ઞાનવિરાગલાભઃ ॥ ૧॥

કેશવોપાસનેન ચતુર્વિધ પુરુષાર્થ-
સિદ્ધિર્ભવતિ શ્રેયોપથે ગમયતિ
અદ્વૈતદર્શિ શ્રી શઙ્કુર ગુરુબોધિત
વિજ્ઞાનમય જ્ઞાનં વિદ્ધિં ગીતસુધાનુત ॥ ૨॥

## ૬૮ કમલાક્ષ ગીતમ્

કમલાક્ષ લોકરક્ષણ તત્પર
કમલનાભ કલુષરાશિ દહનકર ॥ પલ્લવિ॥

કમલારમણ ભવપાશહરણ
કમનીયવદન શેષતલ્પ શયન
ક્ષીરાબ્ધિમથન કમઠાકાર ધારણ
પિતામહ બન્ધન મોચનપ્રવીણ ॥ ૧॥

પ્રેમયોગેશ્વર વસુદેવનન્દન
દૃપદસુતાક્ષય પાત્રા લોલા
દૃપદસુતાક્ષયામ્બર પ્રદાન
પાહિ માં કમલદલલોચન ॥ ૨॥

પરમપ્રેમપૂર્ણ ભક્ત નિવેદિત
કુસુમ પત્ર જલ ફલ સ્વીકારપ્રિય
સાક્ષાત્ શ્રીદેવી સેવિતચરણ
સમસ્ત જીવાશ્રિત ધરારમણ ॥ ૩॥

## ૬૯ માધવ ગીતમ્

મા વિસ્મર માં હે કૃપાનિધિ
માધવ મધુસૂદન દયાનિધિ ॥ પલ્લવિ॥

હે સૃષ્ટિકર્તા સર્વજીવભર્તા
ત્વત્કૃપા માત્રેણ ધન્યોઽસ્મિ ત્રાતા
દીર્ઘકાલાવિદ્યા કારાગૃહે

બન્ધિતં માં કથં મુક્તં કરોષિ ॥ ૧॥

વિષય વિષયિ વિવેચનં દત્વા
ધ્યાતૃ ધ્યાન ધ્યેય ભેદં બોધય
જ્ઞાતૃ કિં જ્ઞેયં કિં વદ નિશ્ચિત્ય
આત્મસુખ પ્રાપ્તિ યાને માં ગમય ॥ ૨॥

## ૭૦ વાણી ગીતમ્

ભવસાગરાત્ માં તારયતુ વાણી
વેદવાઙ્મય જનની વીણાપાણી ॥ પલ્લવિ॥

શ્ૃતિ સ્મૃતિ સાગરે નાવિકા ભવતુ
બુદ્ધિ વ્યવસાયે દીપિકા ભવતુ
દ્વન્દ્વ સમયે તુ સ્થૈર્યં દદાતુ
અતિશયાનુભવે આનન્દં દદાતુ ॥ ૧॥

પરિવાર મધ્યે ભાવશુદ્ધિં દદાતુ
ધ્યેયસાધને અનુકૂલં દદાતુ
અન્તર્મુખ ગમને પ્રજ્ઞાં સ્થાપયતુ
ગીતસુધાગાને રસવાહિની ભવતુ ॥ ૨॥

## ૭૧ ગણનાથ ગીતમ્

પરાશરાત્મજ નુતં ગણનાથં
વન્દે મહાભારત લિપિકર્તારમ્ ॥ પલ્લવિ॥

સુચિત્ર સુન્દર રૂપાકારં મહોદારં
સુધીવરં મનોરથ પૂરણ ચતુરં
અનુત્તમ બુદ્ધિપ્રકાશકરં શુભકરં
પાશાङ્કુશધરં મહોદરમ્ ॥ ૧॥

સિદ્ધિ બુદ્ધિ શુદ્ધિ તેજોદાયકં
સર્વ વિદ્યાધારં ભવાબ્ધિતારકં
ઋષિ મુનિ દિવિજાદિ પ્રથમાર્ચિતં
ગિરિજા સમ્ભવં ગીતસુધાનુતમ્ ॥ ૨॥

## ૭૧ કેશવ ગીતમ્

કન્દર્પ જનક કૌન્તેયાપ્ત સખ
કેશવ તવ સ્મરણે તુષ્યામિ ॥ પલ્લવિ ॥

ક્ષીરાબ્ધીશ નન્દિની રમણ
ક્ષીરાબ્ધિ સદન ગીતસુધાવન
મન્દહાસપૂર્ણ મનોહરવદન
મર્ત્યલોક જીવિકોટિ રક્ષણ ॥ ૧ ॥

ત્રિતાપાગ્નિ શમન ત્રિભુવન ચાલક
ત્રિગુણ પોષક ત્રિભુવન પાલક
અપ્રમેય નિરામય તન્મય
સ્વપ્રકાશ ધરાધીશ ચિન્મય ॥ ૨ ॥

## ૭૩ પુરુષોત્તમ ગીતમ્

પુરુષોત્તમ હે નારાયણ
અક્ષયાનન્દ સુનિકેતન ॥ પલ્લવિ ॥

અવતાર વિશારદ ગોવિન્દ
અવની પ્રિયરમણ પ્રમોદપ્રદ
ભુવનકણ્ટક દૈત્ય ગણ મર્દન
ભવામ્બુનિધિ મગ્ન સમુદ્ધરણ ॥ ૧ ॥

કમલદલ લોચન દયાર્દ્ર હૃદય
શઙ્ખચક્રધર મમાશુ તારય
ત્વત્તઃ પરતરં નાસ્તીતિ ઘોષિતોઽસિ
ત્વયા વિનાહમસ્મિ ગીતસુધાસ્તુત ॥ ૨ ॥

## ૭૪ મુરલીલોલ ગીતમ્

સર્વશક્તિ મૂલ મુરલીલોલ
સર્વતન્ત્ર જાલ યાદવપાલ ॥ પલ્લવિ ॥

માતુલ કંસદ્વેષ સઙ્ઘર્ષ
દેવકી વસુદેવ હૃદયસંસ્પર્શ
શકટ ધેનુક પૂતની ભઞ્જન
સ્વીકુરુ દેવ મમ નીરાજનમ્ ॥ ૧॥

રાજયોગેશ્વર ગાનવિચક્ષણ
રાજવિદ્યાધીશ પ્રપન્નાધીન
નૃત્ય વાદ્ય સ્વાદ પરમલીન
સત્ય નિત્ય મોદબોધ ગીતસુધાવન ॥ ૨॥

## ૭૫ રાઘવ ગીતમ્

અયોધ્યા સામ્રાજ્ય ચક્રવર્તિ
લવકુશજનક રામચન્દ્રમૂર્તિ ॥ પલ્લવિ॥

પ્રજા સ્નેહ પ્રેમ મોદાધાર
ધર્મમર્યાદા રક્ષણ તત્પર
જાનકી પ્રાણેશ શ્રિતપારિજાત
હનુમત્સેવિત વાનર વરદાત ॥ ૧॥

પુત્રકામેષ્ઠિ મહાયાગસમ્ભવ
વિશ્વકલ્યાણ પ્રિય મૃદુભાવ
સર્વદા સ્મરામિ માં ન વિસ્મર
સૌમિત્રિ સોદર ગીતસુધાકર ॥ ૨॥

## ૭૬ કાઞ્ચિ કામાક્ષિ ગીતમ્

ત્વમેવ શ્રીમાતે કઞ્ચિ કામાક્ષિ
ત્વમેવ વરદાતે કાશી વિશાલાક્ષિ ॥ પલ્લવિ॥

ત્વમેવ સુખદાતે વિશ્વૈક કરુણાક્ષિ
ત્વમેવ સંપ્રીતે મધુરાપુરિ મીનાક્ષિ
ત્વમેવ ચતુર્દશ ભુવનૈક જનનિ
ત્વમેવ જ્ઞાન ભક્તિ કર્મ દર્શિનિ ॥ ૧॥

બહિરન્તર્વ્યાપિનિ સર્વશક્તિ ચાલિનિ
સંવિત્સ્વરૂપિણિ શ્રીવિદ્યારૂપિણિ
કૈવલ્ય દાયિનિ મનોરથ પૂરણિ
શિવકામિનિ રઞ્જની ગીતસુધાવનિ ॥ ૨॥

## ૭૭ મુરલીધર ગીતમ્

આશ્રયામિ મુરલીધરં
મોદકરં નિગમાગમસારમ્ ॥ પલ્લવિ॥

જ્ઞાનસાગરં કારુણ્યપૂરં
નિજગલ રાજિત નવરત્નહારં
અદ્ભુતાલઙ્કાર સુશોભિતં
તુલસી માલા પ્રિય તેજોયુતમ્ ॥ ૧॥

અલૌકિક નિરુપમ સૌન્દર્યમૂર્તિ
અગણિત ગુણપૂર્ણમ્ અવતારમૂર્તિ
કૌસ્તુભમણિ કાન્તિપૂર્ણ વક્ષસ્થલં
ગિરિધરં અઘહરં હરં નિર્મલમ્ ॥ ૨॥

તવ દર્શનાય નેત્રશક્તિ કુણ્ઠિતં
તવ દર્શનાય મનોશક્તિરપર્યાપ્તં
તવ લીલાવિલાસાય ધીબલમલ્પં
સદા સ્મરામિ ગીતસુધાસ્તુતમ્ ॥ ૩॥

## ૭૮ લમ્બોદર ગીતમ્

કાર્તિકેયાગ્રજ વિઘ્નરાજ
સ્થિરચિત્તં પ્રસાદય ભાસ્કરતેજ ॥ પલ્લવિ॥

પ્રણવનાદોપાસક ગણનાયક
પ્રપઞ્ચ મોહહર બુદ્ધિપ્રદાયક
મહાદ્ભુત ગાત્ર અગ્રપૂજાપાત્ર
ગિરિરાજ દૌહિત્ર સૂક્ષ્મનેત્ર ॥ ૧॥

વશીકૃત મૂષકાસુર ક્ષરાક્ષર

પાશાઙ્કુશધર નાગાભરણધર
પરશિવાત્મજ કાલુષ્યદૂર
મોદક પ્રિય એકદન્ત ગીતસુધાકર ॥ ૨॥

## ૭૯ પાણ્ડુરઙ્ગ ગીતમ્

શ્રીરઙ્ગનાથ કૃપારક્ષિતોઽસ્મિ
શ્રી પાણ્ડુરઙ્ગ પદાબ્જે ભૃઙ્ગોઽસ્મિ ॥ પલ્લવિ॥

ભુજગેન્દ્ર શયન પક્ષિરાજ ગમન
ભવપાશ મોચન જીવજન્મ પાવન
મન્દસ્મિત વદન રવિ રજની નયન
પુનીતં કુરુ માં સુવિધેયાવન ॥ ૧॥

શઙ્ખચક્ર ગધાધર વિઠ્ઠલરૂપધર
મેધિની રક્ષાકર અસુરસંહાર
શ્રીરઙ્ગધામેશ્વર ગીતસુધાકર
શ્રીલક્ષ્મી પ્રાણેશ્વર મનોહર ॥ ૨॥

## ૮૦ શ્રીરામ ગીતમ્

ઇનવંશસોમ રામ
કોદણ્ડરામ પટ્ટાભિરામ
રામ પાહિ શ્રીરામ પાહિ ॥ પલ્લવિ॥

વૈદેહીપ્રિય મહપુણ્યોદય
રામ પાહિ શ્રીરામ પાહિ
મારુતિ સેવિત મુનિજન સંસ્તુત
રામ પાહિ શ્રીરામ પાહિ ॥ ૧॥

ત્રિજગત્કારણ ત્રિભુવન પોષણ
રામ પાહિ શ્રીરામ પાહિ
રાજીવ લોચન દીનજનાવન
રામ પાહિ શ્રી રામ પાહિ ॥ ૨॥

કરુણાસાગર ધીર ધનુર્ધર

વ્રતધર અઘહર સાકાર
ભયહર નરવર શતૃભયઙ્કર
ગુણગમ્ભીર ઓઙ્કાર ॥ ૩॥

મહિમાસાર વેદાધાર
શ્રીકર શુભકર મન્દાર
પરપ પરાત્પર વીરાગ્રેસર
ક્ષર અક્ષર જગદાધાર ॥ ૪॥

## ૮૧ સ્કન્દમાતા ગીતમ્

મહેશ્વર ભામિનિ ગિરિરાજ નન્દિનિ
સુવિશેષ સુકર્મ રઙ્ગવિહારિણિ ॥ પલ્લવિ॥

મમ ચિત્તસાગર મથનં કુરુ
મે પ્રયચ્છ સદ્ભક્તિ નવનીતં
વાત્સલ્ય પુષ્કરિણિ હે સ્કન્દમાતે
સમાહ્લાદ દાયિનિ સ્કન્દાગ્રજનુતે ॥ ૧॥

ચિચ્છક્તિ સંયુતે જીવપાવનવ્રતે
ઇચ્છા જ્ઞાન ક્રિયા શક્તિત્રય સહિતે
શિવતાણ્ડવેન સહ લાસ્યરઞ્જનિ
સર્વશક્તિ તરઙ્ગિણિ ગીતસુધાવાહિનિ ॥ ૨॥

## ૮૨ ગાયત્રી ગીતમ્

ચિત્ત મન્થન તન્ત્ર પ્રબોધય
વેદજનનિ મમ બુદ્ધિં પ્રચોદય ॥ પલ્લવિ॥

સત્ય જ્ઞાનાનન્તરૂપિણિ સૌધામિનિ
સત્યમોદકારિણિ પ્રોલ્લાસિનિ
સત્ય મધુર વાગ્વાહિનિ ભવતારિણિ
મેધાશક્તિ સંવર્ધિનિ જનનિ ॥ ૧॥

સવિત્રિશક્તિધારિણિ સાવિત્રિ
સુગીત સુધાસ્વદિનિ ગાયત્રિ

વિશ્વામિત્ર ઋષિ તપો પ્રસાદિનિ
વાદ સંવાદ બાધા નિવારિણિ ॥ ૨॥

## ૮૩ દેવકી નન્દન ગીતમ્

સાન્દીપની ગુરુકુલ સંશોભિત
યાદવેશ નન્દન યશોદાપ્રિયસુત ॥ પલ્લવિ॥

જ્ઞાનસિંહાસનાધીશ્વર
યોગેશ્વર નિજ યોગીશ્વર
વસિષ્ઠ વામદેવ ગૌતમાદિ
ઋષિમુનિ વેદ્ય ગીતસુધાસેવ્ય ॥ ૧॥

મત્સ્ય કૂર્મ વરાહ નૃસિંહ વામન
પરશુરામ રામ કૃષ્ણ બુદ્ધ કલ્કીતિ
દશાવતારરૂપધર શાસ્ત્રાચાર્ય
ગોપિકાસુખવર્ધન ગીતાચાર્ય ॥ ૨॥

રાધા પ્રાણસખ રુક્મિણી રમણ
યશોદા મમતાધીન નિરઞ્જન
કુચેલવત્સલ વિદુર ભીષ્મારાધ્ય
શિશુપાલમર્દન ગીતસુધારાધ્ય ॥ ૩॥

## ૮૪ દુર્ગા ગીતમ્

જીવ શુભઙ્કરિ દુર્ગા માતે
લોક વશઙ્કરિ હે જગત્રાતે ॥ પલ્લવિ॥

હરિ હર બ્રહ્મ દત્ત શક્તિરૂપિણિ
દિવિજવૃન્દ દત્તાયુધ ધરિણિ
શુમ્ભનિશુમ્ભાદિ દૈત્યમર્દિનિ
રક્તબીજાસુર અક્ષયરૂપાપોશિનિ ॥ ૧॥

સચ્છક્તિ ચન્દ્રિકે સપ્તમાતૃકે
કરુણાક્ષી ભવ નવ દુર્ગાત્મિકે
કરાલ રૂપધરિ દુર્જનભયઙ્કરિ

સૌમ્યરૂપધરિ સુજનભયાપહારિ ॥ ૨॥

નાનાયુધધરિ નાનાભૂષણધરિ
ગીતસુધાધરિ નયન મનોહરિ
સૌન્દર્ય સાગરિ ધર્મ સ્થાપનકરિ
સચ્ચિદાનન્દકરિ જીવપાવનકરિ ॥ ૩॥

## ૮૫ અનન્ત પદ્મનાભ ગીતમ્

અનન્તશયન પુરવાસ અચ્યુત
અનન્ત પદ્મનાભ વિશ્વાતીત ॥ પલ્લવિ ॥

પૂર્ણકામ ઘનશ્યામ મોક્ષધામ
કુરુ માં કૃતકૃત્યં અનન્તનામ
અનુપમ સૌન્દર્ય લાવણ્યમૂર્તિ
નિરુપમ ભવલીલાનન્દ મૂર્તિ ॥ ૧॥

સકલ દિવિજાર્ચિત વૈકુણ્ઠધામ
સકલ બલ ગુણ યુત ગીતસુધાધામ
ધ્યેયલીન ચિત્તે પ્રકાશયસિ
ગેય તલ્લીન મોદે વિહરસિ ॥ ૨॥

વિરાટ્ સ્વરૂપ જગદાદિમૂલ
વિચિત્ર ચરાચર સૃષ્ટિપૂર્વકાલ
દેશ કાલ દિશાતીત પરબ્રહ્મ રૂપ
પ્રતિજીવ હૃદયે જીવબ્રહ્મ રૂપ ॥ ૩॥

## ૮૬ ગોવિન્દ ગીતમ્

પ્રણવોપાસ્ય હરિ ગોવિન્દ
પ્રપઞ્ચાધાર સચ્ચિદાનન્દ ॥ પલ્લવિ ॥

ત્વમેવ દુર્વિજ્ઞેય તત્ત્વસ્વરૂપ
સન્નિહિતો ભવ વિજ્ઞાનપ્રદીપ
મનોચાઞ્ચલ્ય દોષવિદૂર
મનોહર હિતકર પીતામ્બરધર ॥ ૧॥

ચતુર્બાહુ સહિત શઙ્ખગધાધર
સુદર્શન ચક્રામ્બુજધર શ્રીધર
વૈજયન્તિ માલાલઙ્કૃત વાસુદેવ
ગીતસુધાકર દેવાદિદેવ ॥ ૨॥

## ૮૭ ભુવનેશ્વરિ ગીતમ્

આત્મતત્વ પ્રકાશિની ત્વમેવ
ભુવનેશ્વરી જીવ વિકાસિની ત્વમેવ ॥ પલ્લવિ॥

સમસ્ત ચરાચર ચેતનરુપિણિ
સંસ્કૃતિ પ્રવર્ધિનિ પ્રકૃતિ સંરક્ષિણિ
સત્વશીલસ્ય ધૃત્યુત્સાહ પ્રદાયિનિ
દુરાચાર વશ વિધ્વંસિની ત્વમેવ ॥ ૧॥

ત્રિગુણ ગણ વૈલક્ષણ્ય સ્થાપિનિ
ત્રિજગદ્વ્યાપિનિ ત્રિલોક સઞ્ચારિણિ
ક્ષણ ક્ષણ પરિવર્તિત જીવજગદ્રક્ષિણિ
ગીતસુધા વિનોદિની ત્વમેવ ॥ ૨॥

## ૮૮ અયોધ્યાનાથ ગીતમ્

ઇક્ષ્વાકુ કુલજાતં અયોધ્યાનાથં
ભવતારણં નમામિ શિવનુતમ્ ॥ પલ્લવિ॥

સૂર્યવંશતિલકં શ્રીરામ ચન્દ્રં
સુવિશેષ સદ્ભાવ સુગુણસાન્દ્રં
ચિરઞ્જીવિ પવનજ વાનરસિંહ સંસેવ્યં
ચિદાનન્દપૂર્ણ ગીતસુધાસંસ્તુત્યમ્ ॥ ૧॥

અસ્ત્ર શસ્ત્ર વિશારદં દશરથકુમારં
વિશ્વમોહનરૂપં સીતાપ્રાણેશ્વરં
લઙ્કેશ રાવણ કુમ્ભકર્ણ ગર્વહરં
વિભીષણ ધર્મધ્વજારોહણકરમ્ ॥ ૨॥

## ૮૯ લલિતા ગીતમ્

ચિન્તામણિ પ્રાસાદ નિવાસિનિ
ચિત્ત પ્રસાદં યચ્છ દયાનયનિ ॥ પલ્લવિ ॥

શ્રી લલિતે હે ત્રિપુરસુન્દરિ
શ્રીમાતે હ્રીઙ્કાર તરુવલ્લરિ
કદમ્બ વિપિન સઞ્ચારિણિ
કોમલ કર ચરણ શોભિનિ ॥ ૧ ॥

ક્ષરાક્ષરરૂપિણિ અક્ષય સુખદે
ક્ષમાસનાસીને કામિત વરદે
ઉપનિષત્સાર સુધાવર્ષિણિ
ઉપાસકોદ્ધારિણિ ગીતસુધાવનિ

## ૯૦ કૃષ્ણ ગીતમ્

સુન્દરાતિ સુન્દરં વેણુલોલચરણં
મધુરાતિ મધુરં વેણુપ્રિય વાદનમ્ ॥ પલ્લવિ ॥

ષડ્દર્શનકાર યોગીન્દ્ર જ્ઞેયં
ષડ્રિપુ દમનમ્ ગીતસુધાધ્યેયં
ઋગ્યજુસ્સામાથર્વણ વેદ્યં
ઋષિ મુનિ દેવ માનવ ગેયમ્ ॥ ૧ ॥

શ્રીકૃષ્ણ પ્રાણં વેણુસ્પર્શસુખં
શ્રીકૃષ્ણ સ્નેહમૂલં રાધાહ્લાનં
જન્મ સાફલ્યધનં કૃષ્ણસમ્ભાષણં
નવવિધ ભક્તિગાનં જ્ઞાનોદ્દીપનમ્ ॥ ૨ ॥

## ૯૧ પાર્થસારથિ ગીતમ્

વસુદેવ સઞ્જાત શ્રિતપારિજાત
વેણુનાદમુદિત શ઼ૃણુ મમ ગીતમ્ ॥ પલ્લવિ ॥

ધર્મ સંસ્થાપક અધર્મિ નાશક

નારીકુલ માનજીવન સંરક્ષક
કુરુસમરે ત્વં પાર્થસારથિ
પ્રતિજીવ દેહરથે ત્વમેવ રથિ ॥ ૧॥

નિગમ સારામૃતાસ્વાદક
યોગશાસ્ત્ર શિખર પ્રતિષ્ઠિત ધ્વજ
લલિતકલા વારિધિ રત્નશોધક
ગીતસુધાલોલ કસ્તૂરિ તિલક ॥ ૨॥

## ૯૨ મહાવિષ્ણુ ગીતમ્

શ્રીમહાવિષ્ણું સ્વયમ્પ્રકાશં
વન્દેહં જિષ્ણું ધીપ્રકાશમ્ ॥ પલ્લવિ॥

વન્દે સિન્ધુનન્દિની રમણં
વરદં ચારુ નલિનીપત્ર નયનં
સુખદં તં સચ્ચિત્સુખ પ્રદાનં
સદ્દર્શન સુદર્શન ચક્રધારિણમ્ ॥ ૧॥

પઙ્કેરુહ નાભં પઙ્કેરુહ ચરણં
પઙ્કેરુહ હસ્તં સઙ્કર્ષણં
દામોદરં વામનં પ્રદ્યુમ્નં
ગીતસુધાનુતં શ્રીરઙ્ગધામમ્ ॥ ૨॥

## ૯૩ ત્રિજગન્મોહિની ગીતમ્

વિષકણ્ઠ રમણિ હિમાદ્રિ તનયે
વિઘ્નરાજ સ્કન્ધજનનિ સદયે ॥ પલ્લવિ॥

મમ ભાવગીતં વહતુ તવ પદ પદ્મે
મમ સ્પન્દન સ્રોતં વહતુ તવ હૃત્પદ્મે
અપૂર્વ મનોશક્તિ સંવર્ધિનિ
અક્ષય સૃજનશક્તિ પ્રસાદિનિ ॥ ૧॥

ત્રિશૂલધારિણિ કેસરિવાહનિ
ત્રિજગન્મોહિનિ ત્રિભુવનપાલિનિ

અનન્ય ભક્તિરસ પ્રદાયિનિ
આનન્દસાગરિ ગીતસુધાવનિ ॥ ૨॥

## ૯૪ ગઙ્ગા ગીતમ્

શિવજટાવાસિનિ ગઙ્ગાભવાનિ
મહેશ્વર ભામિનિ મનુકુલ પાવનિ ॥ પલ્લવિ॥

શતશતાપચારાણિ મયા કૃતાનિ
દુરિતક્ષયં કુરુ હિમાદ્રિવાસિનિ
કરુણાર્ણવે ભેધરાહિત્યં પ્રદ
ધારિણી સ્નાન પ્રમોદિનિ સુરુચિરે ॥ ૧॥

ધર્મસમ્પન્નં સુપુનીતં માં કુરુ
જીવકોટિ પ્રાણાધારે મધુરે
ગૌરીસોદરી ક્ષમસ્વ ગમ્ભીરે
ગીતસુધામોદિનિ અપૂર્વ નીરે ॥ ૨॥

## ૯૫ સરસ્વતી ગીતમ્

સરસ્વતી માતે ભવ મદીયાત્મ સખી
સર્વદા અહમસ્મિ લૌકિકે એકાકી ॥ પલ્લવિ॥

ન જાનામિ મમ જન્મકારણં
ન જાનામિ કૌમાર યૌવ્વનવિધાનં
ન શક્નોમિ જરા સ્વાસ્થ્યમર્મં
કથં જ્ઞેયં ધ્યેયં મરણરહસ્યમ્ ॥ ૧॥

ભક્ષણ સમયે શિક્ષણ સમયે ચ
અહમસ્મિ એકાકી પુરુષાર્થં મમૈવ
તવ ગાન ધ્યાન સૃજન નાટ્યેઽપિ ચ
અહમસ્મિ એકાકી પુરુષાર્થં મમૈવ ॥ ૨॥

સ્વતન્ત્ર ક્રિયા ભાવ જ્ઞાનબલાન્
યાચયામિ ત્વયિ સહૃદયસ્વામિનિ
મમ હૃદયનન્દને હે વીણાપાણિ

કચ્છપિ નાદં કુરુ ગીતસુધાવનિ ॥ ૩॥

## ૯૬ શારદા ગીતમ્

સપ્ત ધાતુર્મય શરીરે શારદે
ગુપ્તગામિનિ ત્વમસિ કથં વરદે ॥ પલ્લવિ॥

સ રિ ગ મ પ દ નિ સ્વરાન્તર્યામિનિ
નવરસ સ્વાદુ સુધાવર્ષિણિ
અનન્ત રાગ નન્દન સઞ્ચારિણિ
અક્ષર નાદ સમ્મિલન તોષિણિ ॥ ૧॥

ષડ્જ, રિષભ, ગાન્ધાર, મધ્યમ, પઞ્ચમ
દૈવત, નિષાદેતિ સપ્ત સ્થાન નિવાસિનિ
રાગ તાન પલ્લવિ મેરુ શિખર સ્થાપિનિ
વૈખરી વાગ્વિલાસે પ્રોલ્લાસિની ॥ ૨॥

પ્રસ્થાનત્રય શાસ્ત્ર ભાવ પ્રકાશિનિ
પુરાણેતિહાસ નીતિબોધિનિ
ગ્રન્થરચનકારસ્ય સૃજનપૂર્વે
સાક્ષાત્કારિણિ ગીતસુધાવનિ ॥ ૩॥

## ૯૭ દાક્ષાયણી ગીતમ્

તવ ભક્તોઽહં ત્વયિ રક્તોઽહં
તવ સમક્ષમે સદાશક્તોઽહમ્ ॥ પલ્લવિ॥

હિમાદ્રિ સુકુમારિ લોકશુભઙ્કરિ
મહેશ્વર પ્રિયકરિ કૈલાસેશ્વરિ
અધર્મશીલ રાક્ષસ ભયઙ્કરિ
વર ત્રિશૂલધરિ ગીતસુધાકરિ ॥ ૧॥

સાર્વકાલિક સાર્વ દેશિક જનનિ
સર્વજ્ઞાન સત્યસ્વરૂપિણિ ભવાનિ
દાક્ષાયણિ કાત્યાયનિ શીલરક્ષિણિ
નન્દિ ભૃઙ્ગિ શિવગણ નાટ્યોલ્લાસિનિ ॥ ૨॥

## ૯૮ આત્મારામ ગીતમ્

મા શુચઃ રે માનવ ભુવનાલયે
મધુરં ન કિઞ્ચિત્ સર્વં ભ્રાન્તિમયં આનન્દધામમ્ ॥ પલ્લવિ ॥

આત્મારામં પુરુષોત્તમં સદા
શ્રીરામં સ્મૃત્વા ચ ધ્યાત્વા
અમનસ્કયોગે સાફલ્યં પ્રાપ્સ્યસિ
ગીતસુધા સંલગ્નો ભવ માનવ ॥ ૧ ॥

સંસ્કાર ક્રીડા રઙ્ગમિદં પશ્ય
જયાપજયાનુભવાન્ પ્રપશ્ય
જાગ્રત્સ્વપ્નમિદં માનુષ જીવિતમ્
જન્મ મૃત્યુ ચક્રમપિ ત્વયા કલ્પિતમ્ ॥ ૨ ॥

સુકૃતિનો બહવઃ સન્તિ ધર્મપથે
દુષ્કૃતિનો બાન્ધવાઃ સન્તિ કુપથે
સુખ દુઃખ શૃઙ્ખલૈર્માશુચ માનવ
સર્વત્ર સમત્વે સુખનન્દને વિહર ॥ ૩ ॥

## ૯૯ રાજરાજેશ્વરિ ગીતમ્

રાજરાજેશ્વરિ ત્રિમૂર્તિ જનનિ
આત્મતત્ત્વ પ્રકાશિનિ સનાતનિ ॥ પલ્લવિ ॥

સમસ્ત ચરાચર ચૈતન્ય વાહિનિ
સંસ્કૃતિ પ્રવર્ધિનિ પ્રકૃતિસંરક્ષિણિ
સત્વશીલસ્ય ધૃત્યુત્સાહ પ્રદાયિનિ
દુરાચાર વશ વિધ્વંસિનિ ॥ ૧ ॥

ત્રિગુણ ગણ વૈલક્ષણ્ય સ્થાપિનિ
ત્રિજગદ્વ્યાપિનિ ત્રિદેહ પ્રાણદાયિનિ
ક્ષણ ક્ષણ પરિવર્તિત જીવજીવકણપાલિનિ
સ્પન્દનક્રીડા વિનોદિનિ ગીતસુધામોદિનિ ॥ ૨ ॥

## ૧૦૦ શ્રીવિદ્યા ગીતમ્

ઓઙ્કાર બીજાક્ષરિ હ્રીઙ્કાર તરુમઞ્જરિ નીરાજનમ્ ।
સર્વાક્ષર માલાધરિ સૌન્દર્ય નિધીશ્વરિ નીરાજનં
પૂર્ણેન્દુ વદને શ્રીપદ્મચરણે નીરાજનં
ગીતસુધાસેચને દયાભરણભૂષણે નીરાજનમ્ ॥ ૧॥

શ્રીચક્ર ચિરનિલયે બ્રહ્માણ્ડ વલયે નીરાજનમ્ ।
શ્રીવિદ્યા સમાશ્રયે સૃષ્ટિખેલનપ્રિયે નીરાજનં
સર્વ દેવાધીશ્વરિ યોગપીઠાધીશ્વરિ નીરાજનં
સર્વ ભક્તવશઙ્કરિ સર્વલોકશુભઙ્કરિ નીરાજનમ્ ॥ ૨॥

કામ ક્રોધ દમની મોહ ભ્રાન્તિ નાશિનિ નીરાજનં
ત્રિતાપવિદૂરિણિ ત્રિવર્ગફલ દાયિનિ નીરાજનં
અન્તરઙ્ગવિહારિણિ અન્તર્કલુષહારિણિ નીરાજનં
સદસદ્રૂપધારિણિ સકલ વિશ્વપાવનિ નીરાજનમ્ ॥ ૩॥

ત્યાગગુણ સમર્ચિતે સ્મરણમાત્ર હર્ષિતે નીરાજનં
નાદબિન્દુ કલાતીતે બુદવૃન્દ નિષેવિતે નીરાજનં
સત્તગુણ સંવર્ધિનિ રજોગુણ નિયન્ત્રિણિ નીરાજનં
તમોપાશ મોચનિ ગુણાતીતરૂપિણિ નીરાજનમ્ ॥ ૪॥

સર્વક્લેશ નિવારિણિ સર્વવ્યાધિ પ્રશમનિ નીરાજનં
સર્વ સાધકોદ્ધારિણિ સર્વશક્તિ સઞ્જીવિનિ નીરાજનં
પરન્ધામવાસિનિ પરતત્વ પ્રબોધિનિ નીરાજનં
આત્માનુભવકારિણિ પરબ્રહ્મરૂપિણિ નીરાજનમ્ ॥ ૫॥

ઇતિ શ્રીમતી રાજેશ્વરી ગોવિન્દરાજવિરચિતં
સર્વદેવદેવીસદ્ભક્તિસુમગુચ્છં સમ્પૂર્ણમ્ ।

## અનુક્રમણિકા

૧ ગણેશગીતમ્
૨ સરસ્વતી ગીતમ્
૩ ગાયત્રી ગીતમ્

૪ સરસ્વતી ગીતમ્
૫ લક્ષ્મી ગીતમ્
૬ દુર્ગા ગીતમ્
૭ સરસ્વતી ગીતમ્
૮ સરસ્વતી ગીતમ્
૯ રાજરાજેશ્વરિ ગીતમ્
૧૦ લક્ષ્મી ગીતમ્
૧૧ દુર્ગાદેવી ગીતમ્
૧૨ સરસ્વતી ગીતમ્
૧૩ લક્ષ્મીદેવી ગીતમ્
૧૪ લક્ષ્મી ગીતમ્
૧૫ સરસ્વતી ગીતમ્
૧૬ સરસ્વતી ગીતમ્
૧૭ વાસવી ગીતમ્
૧૮ લલિતા ગીતમ્
૧૯ વાણી ગીતમ્
૨૦ વાગ્દેવી ગીતમ્
૨૧ પર્વતી ગીતમ્
૨૨ દક્ષિણામૂર્તિ ગીતમ્
૨૩ લક્ષ્મી ગીતમ્
૨૪ શિવગીતમ્
૨૫ માધવ ગીતમ્
૨૬ મુરલીધર ગીતમ્
૨૭ ગોપાલ ગીતમ્
૨૮ શ્રીરામ ગીતમ્
૨૯ શ્રીધર ગીતમ્
૩૦ વાસુદેવ ગીતમ્
૩૧ વરલક્ષ્મી ગીતમ્
૩૨ ગૌરી ગીતમ્
૩૩ કેશવ ગીતમ્
૩૪ વિષ્ણુ ગીતમ્
૩૫ સરસ્વતી ગીતમ્

૩૬ દક્ષિણામૂર્તિ ગીતમ્
૩૭ શ્રીકૃષ્ણ ગીતમ્
૩૮ સરસ્વતી ગીતમ્
૩૯ રાજરાજેશ્વરી ગીતમ્
૪૦ શ્રીહરિ ગીતમ્
૪૧ પાર્વતી ગીતમ્
૪૨ વિઘ્નરાજ ગીતમ્
૪૩ સરસ્વતી ગીતમ્
૪૪ પાર્વતી ગીતમ્
૪૫ લક્ષ્મી ગીતમ્
૪૬ રાજરાજેશ્વરી ગીતમ્
૪૭ શ્રી લલિતા ગીતમ્
૪૮ મારુતી ગીતમ્
૪૯ નારાયણ ગીતમ્
૫૦ આઞ્જનેય ગીતમ્
૫૧ આઞ્જનેય ગીતમ્
૫૨ ગણેશ ગીતમ્
૫૩ કાર્તિકેય ગીતમ્
૫૪ શ્રીરામ ગીતમ્
૫૫ ગૌરી ગીતમ્
૫૬ ગણેશ ગીતમ્
૫૭ વાસવિ ગીતમ્
૫૮ ચન્દ્રમૌલેશ્વર ગીતમ્
૫૯ શ્રીરામ ગીતમ્
૬૦ નાદોપાસના પથમ્
૬૧ મારુતી ગીતમ્
૬૨ ગૌરી ગીતમ્
૬૩ શ્રીધર ગીતમ્
૬૪ ચિદ્રૂપિણી ગીતમ્
૬૫ ભારતી ગીતમ્
૬૬ ત્રિપુરસુન્દરિ ગીતમ્
૬૭ પઞ્ચાયતન પૂજા

૬૮ કમલાક્ષ ગીતમ્
૬૯ માધવ ગીતમ્
૭૦ વાણી ગીતમ્
૭૧ ગણનાથ ગીતમ્
૭૧ કેશવ ગીતમ્
૭૩ પુરુષોત્તમ ગીતમ્
૭૪ મુરલીલોલ ગીતમ્
૭૫ રાઘવ ગીતમ્
૭૬ કાઞ્ચિ કામાક્ષિ ગીતમ્
૭૭ મુરલીધર ગીતમ્
૭૮ લમ્બોદર ગીતમ્
૭૯ પાણ્ડુરઙ્ગ ગીતમ્
૮૦ શ્રીરામ ગીતમ્
૮૧ સ્કન્દમાતા ગીતમ્
૮૨ ગાયત્રી ગીતમ્
૮૩ દેવકી નન્દન ગીતમ્
૮૪ દુર્ગા ગીતમ્
૮૫ અનન્ત પદ્મનાભ ગીતમ્
૮૬ ગોવિન્દ ગીતમ્
૮૭ ભુવનેશ્વરિ ગીતમ્
૮૮ અયોધ્યાનાથ ગીતમ્
૮૯ લલિતા ગીતમ્
૯૦ કૃષ્ણ ગીતમ્
૯૧ પાર્થસારથિ ગીતમ્
૯૨ મહાવિષ્ણુ ગીતમ્
૯૩ ત્રિજગન્મોહિની ગીતમ્
૯૪ ગઙ્ગા ગીતમ્
૯૫ સરસ્વતી ગીતમ્
૯૬ શારદા ગીતમ્
૯૭ દાક્ષાયણી ગીતમ્
૯૮ આત્મારામ ગીતમ્
૯૯ રાજરાજેશ્વરિ ગીતમ્

૧૦૦ શ્રીવિદ્યા ગીતમ્

Composed by Rajeswari Govindraj
Encoded and proofread by Rajeswari Govindraj

*Sarva Deva Devi Sadbhakti Sumaguchcham*

pdf was typeset on September 16, 2023

Please send corrections to *sanskrit@cheerful.com*